श्री:

Srimad Vedantha Desika's

NYASA VIMSATI

(with the Commentary of Sri Narayana Muni)

Edited & Published by :

Dr. K. ANANTHA, M.A., Ph.D.,
84-B/72, Veeraperumal Koil Street,
Mylapore, Chennai - 600 004.

2000

Srimad Vedantha Desika's

NYASA VIMSATI

(with the Commentary of Sri Narayana Muni)

Edited & Published by:

Dr. K. ANANTHA, M.A., Ph.D.,

(Part Time Lecturer in the Madras Sanskrit College &

D.G. Vaishnava College, Arumbakkam, Chennai.)

84-B/72, Veeraperumal Koil Street,

Mylapore, Chennai - 4.

2000

First Edition: 2000

Price : Rs. 40.00

Laser Typesetting by :

Elango Achukoodam

166, Royapettah High Road,


Mylapore, Chennai 600 004

Phone: (044) 499 1821

श्रीमद्वेदान्तदेशिक विरचिता

न्यासविंशतिः


(श्रीमन्नारायणमुनिविरचितव्याख्या सहिता)



सम्पादकः

डॉ. के. अनन्तः, एम.ए., पिएच.डि.

विषय सूची



திருவேங்கடமுடையான்

PREFACE

I am full of gratitude towards my Mentor. Guide and preceptor "Mahamahopadhaya" Sri U.Ve. V. Srivat sankachariyar who has spared his precious time to write me a very detailed introduction to this book "Nyasa-Vimsati". The introduction not only introduces the book but also explains the contents of the book elaborately.

I am extremely thankful to Sri U.ve. V.S. Karunakaran for giving a detailed foreword in English what was said in the introduction is stated in lucid English, for those in need. Both the forewords are great helping sources affording the understanding of the unique and unparalled work of Sri Vedanta Desika with commentery of Sri. Narayana Muni Sri U.Ve. V. S. Karunakaran's foreword serves all lovers of sanskrit to appreciate and delight in the commentary of Nyasa - Vimsati composed in the grand sragdhara meter.

Sri Prof. S.B. Raghunathacharya, Former vice-chancellor, Rashtriya Sanskrit Vidyapeetha (Deemed University), Tirupathi, was my main inspiration in editing this work and I sincerely thank him for the same.

I also take this oppourtunity to thank the curator of the Oriental Manuscripts library of the university of Madras for granting me permission to copy the text from their library.

But for the magnanimous financing assistance given by Sri D. Govindarajan (Shanthi Colony, Anna Nagar) this work would not have been a success. I am indebted to Sri D. Govindarajan for the publication of this rare composition.

I would like to thank my brothers Sri K. Seshadri and Sri K. Srinivasan for their continuous support. In same way it is my duty to thank Sri V. Narayanan of S. Navalpakkam also at this juncture.

I thank M/s Elango Acchukoodam. Chennai-4. for their best efforts in getting the book neatly printed.

Place : Chennai **Kozhiyalam Anantha**

श्रीः

न्यासविंशतेः भूमिका

श्री वा. श्रीवत्साङ्काचार्यः

भूतपूर्वप्रांशुपालः, मद्रास् संस्कृत महाकलाशाला, महिलापुरी, चेन्नै–४;
Prof . French Institute of Indology, Pondicherry - 605001

श्रीमन्निगमान्तमहागुरुभिः विशिष्टाद्वैतसिद्धान्ते इव, सम्प्रदायेऽपि बहवो ग्रन्था निरमायिषत । मुक्त्यर्थम् अवश्यानुष्ठेयत्वेन श्रुतिस्मृतीतिहासपुराणपाञ्चरात्रदिव्यसूरिसूक्तिपूर्वाचार्यग्रन्थाद्यनुसारेण शरणागतिः बहोः कालादारभ्य अस्मत्सम्प्रदायनिष्ठैराश्रिता । अनुष्ठानेऽपि तदादरः प्रादर्शि । गच्छति काले रहस्यरूपेण अनुष्ठीयमानायाः शरणागत्यपरनाम्न्याः प्रपत्तेः स्वरूपादिविषये सम्प्रदाये महान् कोलाहलः प्रादुरभूत् । सर्वत्र सिद्धान्तेषु इयमेव रीतिः । अद्वैतं कीदृशम् ? इति निरूपणाय प्रवृत्तैः श्रीभगवत्पादानन्तरकालिकैः स्वस्वग्रन्थेषु एकजीववादः, नानाजीववादः, ध्याननियोगवादः, निष्प्रपञ्चीकरणनियोगवादः इत्यादिरूपेण प्रवर्तितो वादकोलाहलोऽद्यापि न शान्तः । किं बहुना ? वासुदेवाद्वैतम्, ब्रह्माद्वैतम्, सदद्वैतम्, संविदद्वैतम्, शिवाद्वैतम्, देवताद्वैतम्, निर्विशेषाद्वैतम् इत्याद्याकारेण तत्तद्ग्रन्थेषु वादिनां स्वबुद्धिचातुर्यप्रयुक्ताः मतिभेदा निरङ्कुशाः । एवं तत्तत्सिद्धान्तेष्वपि स्थूलदृष्ट्या केनाप्याकारेण साम्ये विद्यमानेऽपि अवान्तरविषयशोधनावसरे मतभेदाः वाचामगोचराः । इयमेव रीतिर्विशिष्टाद्वैतिनामस्माकमपि । श्रीमद्यामुनमुनिभिः ‘‘अकिञ्चनोऽनन्यगतिः शरण्य ! त्वत्पादमूलं शरणं प्रपद्ये’’ इत्यनुसंहितम् । सिद्धान्तभागाः प्रायः सर्वत्र सदस्याः । अनुष्ठानमात्र-

पराः साम्प्रदायिकास्त्वर्थाः प्रायेण रहस्यभूताः । यतो हि रहस्यस्य गोपनीयत्वं महर्षिभिरभिहितम् । तत्तन्मन्त्रमूलकत्वाद् रहस्यार्थानाम्, मन्त्राणां च ''मन्त्रं यत्नेन गोपयेत् '' इति शास्त्रानुसारं गोपनीयत्वमामनन्ति सन्तः । ''यदृच्छया श्रुतो मन्त्रः छन्नेनाथ च्छलेन वा । पत्रेक्षितो वा व्यर्थः स्यात् प्रत्युतानर्थदो भवेत् '' इति मन्त्रविदामादेशः । अतश्च मन्त्रेषु निश्चितरूपेण आनुपूर्वीपरिज्ञानेऽपि मन्त्रार्थविवेचने प्रकारभेदाः तात्पर्यान्तरवर्णनादिकं च आनुभविकान्येव । प्रणवः स्वतन्त्रो मन्त्रः सन्नपि मन्त्रान्तरेषु अङ्गभावं लभते । ''ओमित्यात्मानं युञ्जीत'' इति श्रुतिः। शरणागतेः करणत्वेन प्रणवोऽभ्युपगतः । तत्र अकार–उकार– मकाररूपवर्णत्रयसमुदायात्मकस्यास्य स्वरूपतस्तुल्यत्वेऽपि तत्तत्प्रकरणानुरोधेन, तत्तसिद्धान्तानुसारं च तात्पर्यवर्णनं भिद्यते एव । अकारवाच्यो भगवान् नारायण एव इत्यत्र, मकारो जीववाचकः इत्यत्र, एव उकारस्यावधारणा - र्थकत्वेऽपि च अद्वैतिनां विशिष्टाद्वैतिनां च तुल्योऽभिप्रायः । परं तु अकारं प्रथमान्तत्वेनाभ्युपेत्य, अः = अकारवाच्यो नारायणः, उ= एव, म्=जीवः इति ते वर्णयन्ति। ''अकारेणोच्यते विष्णुः सर्वलोकेश्वरो हरिः । उद्धृता विष्णुना लक्ष्मीरुकारेणोच्यते तथा । मकारस्तु तयोर्दास इति प्रणवलक्षणम्'' इति कठश्रुतिं प्रमाणीकृत्यास्माभिस्तत्र अकारः लुप्तविभक्तिक इत्याश्रीयते । मूलमन्त्रे सन्निध्याम्नात–चतुर्थ्यन्तनारायणपदसमभिव्याहाराच्च चतुर्थ्यन्तोऽकार इति सम्प्रदायवृद्धाः । ''हविर्गृहीत्वाऽऽत्मरूपं वसुरण्येति मन्त्रतः । जुहुयात् प्रणवेनाग्नौ अच्युताख्ये सनातने'' इत्युपबृंहणमपि प्रणवस्य लुप्तविभक्तिकत्वं विशदयति । अतश्च जीवपरयोर्भेद एव प्रणवप्रतिपाद्यः

इति आस्माकः सिद्धान्तः । एतादृश्या रीत्या शरणागतेः स्वरूपे, अङ्गेषु पूर्वकृत्येषु उत्तरकृत्येषु प्रभावे उद्देश्यदेवताद्वन्द्वे इत्याकारेण बहुविधाः क्षोभाः श्रीभाष्यकाराणामनन्तरे गणरात्रे प्रादुरभूवन् । **शरणागतिगद्यस्य** स्तोत्ररूपत्वात्- शरणागतिलक्षणस्य, स्वरूपस्य, अङ्गानाम्, पूर्वोत्तरकृत्यादीनां च स्पष्टं तस्मात् परिज्ञानं मन्दमतीनां दुश्शकम् । व्यङ्ग्यप्रधानेषु स्तोत्रेषु स्पष्टं तेषां विवेचनं च प्रायो दुर्घटम् "இந்த निष्कर्षங்கள் எல்லாம் श्रीभाष्य த்தில் सत्सम्प्रदायத் தோடே கூட चिरपरिचयம் பண்ணின महाप्राज्ञருக்கு நில மாயிருக்கும்" इत्याचार्यैरेव एतादृशसूक्ष्मांशानां अवगतेर्गमनिका व्यक्तमभिहिता । अवश्यज्ञातव्यांशानाम् रहस्यम्,- रहस्यम् इति नितरां गोपनेऽपि पाश्चात्कालिकानां स्पष्टमेषामाशयो न ज्ञायेत । आगमविच्छेदात् क्वचित् सम्प्रदायान्यथाकरणमपि सम्भाव्येत अतः गोपनीयस्याप्यंशस्य क्रमेण पूर्वैः विवरणमुपक्रान्तम् । तत्र मन्त्रार्थविवरणपरेषु ग्रन्थेषु **श्रीपराशरभट्टारकाणाम् अष्टश्लोकी** प्रथमपरिगणनीया । तेषां तातपादैः श्रीकूरत्ताऴ्वान् इति विख्यातैः श्रीभगवद्रामानुजाचार्यप्रधानशिष्येष्वन्यतमैः श्रीवत्साङ्कमिश्रैः गीता- चरमश्लोकव्याख्यानम् इति कश्चन ग्रन्थः प्रसादित इति आचार्यैः श्रीमति **रहस्यत्रयसारे** उपादानात्ज्ञायते; उद्धृतौ च तस्मात् द्वौ श्लोकौ प्राचीनैर्व्याख्यातृभिः । परं तु स ग्रन्थोऽधुना न लभ्यते । **षडर्थसंक्षेपे श्रीराममिश्रैः** केचन रहस्यार्था विवेचिता इति आचार्याणां ग्रन्थेभ्योऽवगम्यते । सोऽपि ग्रन्थोऽलभ्य इदानीम् । "तिरुक्कण्णमङ्गै आण्डान्" इति प्रसिद्धैराचार्यैः श्रीनाथमुनिमिश्राणां शिष्यैरपि रहस्यग्रन्थः कोऽपि आरचित इति श्रीमन्निगमान्तगुरुभिरभय-

प्रदानसारग्रन्थे तस्मादुद्धरणादवगम्यते । शठमर्षणान्वयजात–**श्रीविष्णुचित्त–वरदाचार्य–वादिहंसाम्बुवाह**प्रभृतिभिर्ये ग्रन्थाः शरणागतिविषये निर्मितास्तेषु ''नडादूर्–अम्माल्'' इति विश्वविख्यातानां **वात्स्यवरदगुरूणां प्रपन्नपारिजाताख्यः** ग्रन्थः परं सुरक्षितो जागर्ति । एवं स्थिते स्वयं निर्णयासमर्थानाम् अभ्यर्थनया प्रकृतः ग्रन्थोऽयं न्यासविंशतिनामक आचार्यैर्धारणासौकर्याय छन्दोबद्धो निबद्धः । **शरणागतिदीपिका, न्यासतिलकम्** इति यद्यपि एभिरेवाचार्यैर्निर्मिते विराजेते; तथाऽपि तयोः भगवत्स्तुतिरूपत्वात् स्तोत्रप्रकरणानुगुणं केचनैव विषया विशदीकृताः । **निक्षेपरक्षा** प्रभृतय इतरेषामाशयं सविवृतिं निरसनोन्मुखा इति तत्खण्ड्यत्वेनाचार्यैरुपात्त. स्य ग्रन्थस्य **मेघनादारिसूरिविरचितस्य मुमुक्षूपायसंग्रह**नामकस्य (मुद्रितोऽयं मुमुक्षूपायसंग्रहः गद्यपद्यात्मकः आन्ध्राक्षरैः बहोः कालात् पूर्वम्) दर्शनेन ज्ञायते । खण्डनग्रन्थेषु प्रायः खण्ड्यत्वेनाभिमतानां विषयाणामेव विमर्शनं क्रियेत इति सर्वत्र परिदृश्यमाना गतिः । तेन स्वाभिमताः आवश्यकाः शरणागतिविषयका अंशास्तत्र केचिदेव स्युः यद्यपि समस्ताक्षेपसमाधानात्मकं रहस्यत्रयसाराभिधं सम्प्रदायनिष्ठैः अवश्याध्येयत्वेन सभक्तिश्रद्धं प्रतिदिनमाद्रियमाणम् आचार्यग्रन्थरत्नं वर्वर्ति, तथाऽपि तस्यातिविस्तृतत्वात् प्रकरणशोऽधिकारशश्च विभज्य तस्य ग्रन्थस्य प्रमेयशोधने प्रवृत्तत्वात् न तस्मात् झटिति आवश्यकाः सर्वसंशयापनोदका अंशाः अवगन्तुं सर्वे पारयेयुः । अत्यन्तं संक्षिप्य **सारसंक्षेपादि**ग्रन्थानां कृतत्वात् ''त्रिभिरनवधिकार्थं संगृहीतं रहस्यैः'' इत्याचार्यैरेव प्रतिपादितयारीत्या तैरपि ग्रन्थैः प्रपत्त्यादिस्वरूपं शृङ्गग्राहिकया नावगन्तुं शक्यते । अत ईदृशस्यातिसंक्षिप्तस्य सर्वसंशय-

निर्मोक्तुर्ग्रन्थस्य आवश्यकता जाता। अत्रापि केषाञ्चन प्रमेयाणां संक्षिप्य कथनात् आचार्यैः स्वयमेव व्याख्याव्याजेन विवरणं कृतम् । ''विपुलतरमतीनां व्यासतः ख्यापयिष्यन्'' इति सपीठिकं प्रवृत्तेऽपि श्रीसारशास्त्रे नात्रत्यशैल्या सर्वांशविवेचनं एकत्रालक्ष्यते । सदस्य-रहस्यात्मकेषु प्रामाणिकादृतेषु वर्त्मसु रहस्यांशानां यद्यपि प्रकटनं न कार्यम्, तथाऽपि भट्टारकप्रभृतिभिः प्रकाशनस्योपक्रान्तत्वात् किञ्चिद् विस्तरेण वक्तव्यमापतितम् । तत्र उपदेशानुष्ठानात्मके सम्प्रदाये अनुष्ठानेन प्रकाशनं तत्कालस्थितानामुपयोगायैव कल्पेतेति विमृश्य उपदेशरूपेणापि ग्रन्थारूढोऽयं रहस्यांशः कृतः । तदेवाभिहितमाचार्यैः—

''विवृतामिह रहस्यं यन्मया गोपनीयं स्खलितमपि यदीषद् भूयसा वा तदेतत् ।
निजमहिमविशेषप्रेममात्रेण नाथः क्षमत इति विचिन्त्य क्षन्तुमर्हन्ति सन्तः ॥''

इति **निक्षेपरक्षायाम्,** एवम् — ''*எங்கள் தேசிகரே*'' *இது வழி எய்துக* '' *என்று உகப்பால் எம்பிழை பொறுப்பார்*'' इति **निगमनाधिकारे** च ।

प्रकृते ग्रन्थे न्यासविंशत्याख्ये— नामनिर्देशानुसारं विंशतिश्लोकेषु स्रग्धरात्मिकेषु क्रमेण शरणागतिमधिकृत्यावश्यावगन्तव्या इमे विशेषा निर्णीताः — १ शरणागतिमार्गेण भगवन्तं प्राप्तुं य इच्छति तेनाश्रयणीयस्य आचार्यस्य लक्षणम् । २ ईश्वरे ये गुणाः आश्रयणोपयोगिनः ते एवाचार्येऽपि । अतः '' देवमिवाचार्यमुपासीत'' **इत्यापस्तम्बोक्त्या** आचार्योपासनं गीतादिषु दैवसम्पन्मध्ये परिगणितमस्ति ३ शिष्यलक्षणानि, आचार्यकृता शिष्यपरीक्षा । ४ आचार्येण शिष्याय करणीय एकान्तोपदेशः , तत्त्व—हित—पुरुषार्थविवेचकतया

तस्याचार्योपदेशस्य शिष्येण सदा मनसि अनुसन्धानम्। ५ मोक्षोपाययोः मध्ये-शक्तस्य भक्तिः, अशक्तस्य प्रपत्तिः इति विवेचनम्। ६ शरणा– गतेः प्रभावः, तस्याः पूर्वैः स्वस्वग्रन्थेषु बहुधा प्रपञ्चनम् ७ ''शास्त्र- विश्वासशाली'' इति सामान्यतोऽभिहितेन विश्वासेनैवालम्; किमर्थं प्रपत्त्यङ्गेषु महाविश्वासनामकस्य कस्यचित् परिगणनम्? इत्याशङ्कायाः समाधानम् ८ केनापि प्रकारेण शरणागतिः निष्फला न भवेत्; अपि तु फलेग्रहिरेव इति निरूपणम् ९ भक्तिवत् शरणागतिरपि साक्षान्मोक्षोपाय इति संस्थाप्य, तन्निष्ठस्य प्रभाववर्णनम्। १० ब्रह्मसूत्रेषु शरणागतिविधिः कुत्रेति विचारे, एतस्या अपि उपायत्वेन तत्र संगृहीतत्वम्। ११ शरणागतेरङ्गानि सन्ति इति तत्परशास्त्रपरामर्शेन निष्कर्षः, लोकदृष्ट्याऽप्येवमेवेति साधनम् १२ अङ्गानां विषये साम्प्र दायि- केषुधनम् केषाञ्चन वैमत्यम्, तदपनोदनं च। १३ शरणाग तिलक्षणशो एतावत्पर्यन्तं दृष्टादृष्टरूपोभयप्रपत्ति। १४ मोक्षा र्थशरणागतौ केचन विशेषाः। १५ शरणागतेनापि स्वस्व वर्णाश्रम– धर्माः अवश्यमनुष्ठेया इति स्थापनम्। १६ सिद्धोपायभूतस्य भगवत एव प्राधान्यात् शरणागतिर्न उपायः इत्याक्षेपस्य समाधानम्। प्रसङ्गात् चरमश्लोके ''माम् एकम्'' इत्युक्तेः तात्पर्यवर्णनम्। १७ उपायशब्दार्थः। सिद्धोपाय-साध्योपाययोरसङ्कीर्णरूपेण निर्वचनम्। १८ अङ्गपञ्चकसम्पन्नायाः शरणागतेः अनुष्ठानप्रकारकथनम्। ''सकृत् कृतः शास्त्रार्थः'' इति न्यायेन मोक्षार्थप्रपत्तेः सकृत् कर्तव्यत्वम्। पुरुषविद्यायाः तात्पर्यवर्णनम्। १९ शरणागतस्य उत्तरकृत्यशोधनम्। नित्यनैमित्तिककर्मणामवश्यानुष्ठेयता। अनिषिद्ध– काम्यानामावश्यकत्वे, तेषां सिद्ध्यर्थं भगवतः, यद्वा भगवद्भक्तेभ्य एव

तद्विषये प्रार्थनं न्याय्यमिति निरूपणम् । २० आज्ञाकैङ्कर्याणि अपरित्याज्यानि । तानि पूर्वाचार्यानुष्ठानानुसरीणि स्युः । स्वशक्त्यनुसारम् अनुज्ञाकैङ्कर्येषु प्रपन्नैः प्रवृत्तैर्भाव्यम् । प्रपत्तिप्रभावात् सञ्चितकर्मणां निवृत्तिः । प्रारब्धकर्मणां पुण्यापापरूपाणामस्मिन्नेव जन्मनि अनुभवः–इत्यादिरूपेण प्रक्षीणाशेषकल्मषः स्वाभीष्टकाले भगवत्पादमूलं प्रपन्नः विशति इति निरूपणम् । २१ वेदान् स्मृत्यादीन् भगवन्मुखोद्गतश्रीपाञ्चरात्रसंहितादीन् श्रीवाराह–श्रीराम–श्रीकृष्णचरमश्लोकादिकान् दिव्यसूरिसूक्तिनिचयांश्च आधारीकृत्य श्रीमान् वेदान्ताचार्यः इत्थं पूर्वाचार्यविरचित–बहुग्रन्थसंवादेन प्रपत्ति–प्रपन्न– प्रपत्तव्यस्वरूपविवेचनं सुधियां श्रेयसे व्यवृणुत इति निगमनम् २२ एतावता प्रतिपादितानां विषयाणां क्रोडीकारेण सङ्गृह्य स्वाभीष्टार्चामूर्तौ श्रीकाञ्चीवरदराजेपरब्रह्मणि शरणागतेः स्वयमनुष्ठान-मुखेन प्रदर्शनम् इत्येवमत्र विषयसंग्रहः ।

अस्याः न्यासविंशत्याः आचार्यैः स्वयमेव व्याख्या संक्षिप्ता विरचिता, याऽन्तेऽत्रापि आयोजिता । परं तु बह्वर्थगर्भत्वात् तस्याः प्रतिपदं विवरणसापेक्षत्वात्, प्रमाणप्रदर्शनपूर्वकं प्रतिविषयं निरूपणं प्राप्तकालमिति दृष्ट्वा विस्तृता व्याख्या **श्रीमन्नारायणमुनीन्द्रैः** एभिः आरचिता । बहोः कालात् प्रागेव आन्ध्र–ग्रन्थ–नागराक्षरैः तत्र तत्र मुद्रिता इति ज्ञायते । तथा परिष्कृत्य मुद्रणार्थमयमुपक्रमः । सव्याख्या न्यासविंशतिः श्रीमन्निगमान्तमहादेशिकैः कृतानां स्तोत्राणां मध्येऽन्तर्भूता । अस्याः स्तुतेः द्राविड–आन्ध्र– आङ्गल–कार्णाटक–हिन्दीभाषासु अनुवादाः अस्माभिः दृष्टाः । श्रीमद्भिः ब्रह्मविद्भिः विपश्चिदपश्चिमैः सर्वशास्त्रपारङ्गतैः श्रीवेङ्कटाद्ध्वयग्रहारम्.

वे. अनन्ताचार्यैः अस्याः विस्तृता या द्राविडीव्याख्या सा विदुषामामोदावहा। तस्याः पुनर्मुद्रणमावश्यकम्।

अस्मत्तोऽधीतसर्वशास्त्रः श्रीमान् प्रवचनपटुर्विनीतः कोलियालम् अनन्तनामायं अपूर्वग्रन्थप्रकाशनेदम्परः साम्प्रतममुं ग्रन्थं प्रकाशयितुमुत्सुक आसीत्। संवादार्थं मूलमातृकान्तरस्य अलाभात् काश्चन त्रुटयोऽत्र अनिवार्याः स्युः। प्रक्रमपरिवर्तनादिकमपि क्वचिल्लक्ष्यते। तथाऽपि श्रीमन्नारायणमुनयः श्रीमन्निगमान्तगुरुषु नितान्तं भक्तिपरवशाः विवक्षितसकलांश–प्रदर्शनपटवः प्रमाणकुक्षयः सम्प्रदायविदः आचार्याणाम् इतरग्रन्थेषु कृतचिरपरिचयाः आवश्यकापेक्षितविवेचनकुशलाः आचार्यकृतव्याख्यानानुरोधेन स्वीयां व्याकृतिमिमामायोजयन्। प्रायः चतुश्शतसंवत्सरप्राक्कालिकाः इमे व्याख्यातार इति ज्ञायते। प्रणवस्य त्रैवर्णिकैकाधिकारिकत्वमेते सप्रमाणं साधयन्ति। अतः प्रणवस्य सर्वयोग्यत्वम् इति नवीनानां प्रचारस्य पूर्वकालिका एते इति सुज्ञानम्। एभिः प्रतिपदमियं विंशतिर्विवृता सप्रमाणम्। आर्षसूत्रवत् बह्वर्थगर्भत्वात् न्यासविंशत्याः इतः परमपि विस्तरेण व्याख्यानम् अपेक्षितमेव। तथाऽपि ''ज्ञातव्यम् अन्यदपि तैर्निरणायि सम्यग् ग्रन्थान्तरेष्विति न किञ्चिदिहास्ति चिन्त्यम्'' इत्युपनिषद्भाष्यकारैः आचार्यग्रन्थविषये या गतिर्निगमने प्रतिपादिता तामेवावलम्ब्यास्माभिः तूष्णीकैर्भूयते।

ग्रन्थस्यास्य सम्यग् गुरुमुखादध्ययनेन सर्वे स्वाभीष्टं प्राप्नुवन्तु इत्याशास्महे। चि. को. अनन्तस्य प्रयासाः सफलाः शास्त्रव्यासक्तिमन्तश्च भूयासुरिति भगवन्तमभ्यर्थये।

वा. श्रीवत्साङ्काचार्यः

FOREWORD

Sri V.S. KARUNAKARAN, B.E., MIE.,
Director, SISI, Chennai
(Son & Disciple of Sri U.Ve. Villur Nadadoor
Sribhashya Simhasanam Mahavidwan Asukavisarvabhouma
SRINIDHI SWAMY)

1. Need for the English Foreword:

I felt extremely elated when the youthful Sanskrit Scholar Dr. Kozhiyalam Anantachariar, more popularly known as "**Anantha**" in our inner circle offered me the assignment of writing an English Foreword to his Edition on Nyasa Vimsati of Vedanta Desika with the Sanskrit commentary of one Narayana Muni. The Editor's Mentor Mahavidwan Prof. V. Srivatsankacharyar, former Priincipal, Sanskrit College, Mylapore has written an elaborate Bhoomika to this Edition in Sanskrit, in which all that need to be said in this connection has been covered. Still Dr. K. Anantha's idea seems to have an introduction in English also for the benefit of those who are more at ease with English. I am writing this foreword in English in my desire to honour his affection.

2. About Nyasa Vimsati

The importance of the work need not be elaborated. It is enough if we appreciate that is one of the works of Vedanta Desika. It deals with "Surrender concept".

Swamy Desika has written more than 100 works. Many of them, if not all of them, have "Surrender to Him", as a component of the themes. Some of his works like his Rahasya Traya Sara – the magnum opus have this as focal point. Works like Nikshepa Raksha have been in defence of the concept evidently in response to some criticism. He wrote four works in verse form in Sanskrit on this concept:

1. Nyasa Dasaka
2. Nyasa Vimsati
3. Nyasa Tilakam
4. Saranagati Deepika

of the four, except Nyasa Vimsati, others are in the form of Stotra praising the Lord and simultaneously giving the nuance of this concept. Nyasa Vimsati is unique in that it is a highly structured work and serves as a compendium on the concept. Not strictly in the form of a Stotra, it is virtually a science work i.e. Sastra. The work is in verse form so that readers can retain the work in memory with ease. Swamy Desika has only developed the work on the lines of Prapanna Parijata of his grand Preceptor Nadadoor Ammal who had opted for verse-media. Swamy Desika has employed the grand Sragdhara meter, a favourite of his, in this work.

3. Structure of Nyasa Vimsati

The work contains 22 Slokas and following are the themes sloka-vise:-

Sloka	Theme
1.	The standards for a Preceptor whom one should approach for getting into the Path of Emancipation.
2.	Preceptor equated to Lord Narayana

18. How to perform Surrender with its five components?

19. Post-Surrender life for the one surrendering

20. The one Surrendering cannot for sake duties laid down for him in scriptures even after surrender

21. Conclusion spelling the authority for the work and

22. Surrender illustrated (Hands on type) by Desika Himself at the feet of Lord Varadaraja of Kancheepuram.

4. Commentaries to Nyasa Vimsati

Swamy Desika himself at the behest of his elderly contemporaries has written a small foot-note type commentary in Sanskrit to this work.

One other elaborative commentary in Sanskrit and one in Manipravalam by Karukkuruchchi Nadadoor Venkata Ramacharyar were published along with the commentary of Desika in 1908.

From V. Srivatsankacharya Swamy's Sanskrit foreword it is seen that there have been a few more commentaries published in many other languages.

5. Present Edition

The elaborate Sanskrit commentary cited in previous para was attributed to one Srinivasa in the title page of 1908 edition. But in the last page the commentary ends with a sloka which was printed in Grantha Akshara. The sloka as printed reads thus:-

श्रीमन्नारायणमुनिसंप्रदायानुसारतः ।
टीकां विद्वन्महप्रीत्यैव चकार न्यासविंशतेः ॥

Title page mentions one Srinivasacharya as Author whereas concluding page gives the sloka cited above. As printed the sloka did not convey much and confused for the sentence formed out of the first half of the sloka had missed the subject itself. The second half did not also seem to be reading correctly.

Dr. K. Anantha has edited and published the second commentary now. In his edition the sloka cited reads

श्रीमन्नारायणमुनिः संप्रदायानुसारतः ।
टीकां पटीयसां प्रीत्यै चकार न्यासविंशतेः ॥

In this reading it is clear that the Author for the commentary is one Narayana Muni. Because of the reading adopted by Dr. K. Anantha the 'Subject' for the sentence out of the first half of the sloka is traced. The second half also makes better reading.

That the author for the commentary is one Narayana Muni is clear from the reading adopted by Dr. K. Anantha. Dr. K. Anantha therefore clarifies the confusion created in 1908 edition by mentioning Srinivasacharya as the Author for the commentary in the title page.

Dr. K. Anantha, a well-trained scholar under the great Vidwan V. Srivatsankacharya has thus brought out a critical edition of the commentary with limited resources. It is fitting to his scholarship and the training he had from the elders. He has got a flair for bringing out rare works. He has already published Vidhitraya Paritranam, a work in Meemamsa. The present one is another feather in his hat.

I am sure Dr. K. Anantha will move from strength to strength and bring out more and more such works in his future - which by the grace of Lord should span upto hundred years. I wish him all the best in all his literary endeavours.

नारायणाख्यमुनिवर्यकृतां सुटीकां
श्रीन्यासविंशतिपरां विदुषां मुदेऽद्य ।
श्रीमाननन्त विबुधः प्रथितां दधानः
संशोध्य सौम्यवपुषा जयतात् चिराय ॥

❊ ❊ ❊

श्रीः

शुभमस्तु

श्रीमद्वेदान्तदेशिकविरचिता

न्यासविंशतिः

(श्रीमन्नारायणमुनिविरचितव्याख्यासमलङ्कृता)

आत्रेयरामानुजदेशिकेन्द्रपादारविन्दप्रवणात्मवृत्तिम् ।
समस्तकल्याणगुणाम्बुराशिं वेदान्तविद्यागुरुमाश्रयामः ॥

सकलश्रुतिस्मृतीतिहासपुराणेषु अन्तस्सारतया प्रतिपाद्यमानां भगवत्पराङ्कुशपरकालनाथयामुनयतिवरादिसकलदेशिकवरपरिगृहीतां त्यागनिक्षेपन्यासाद्यपरनामधेयां प्रपत्तिविद्यां सङ्ग्रहीतुकामो भगवान् श्रीरङ्गराजदिव्याज्ञालब्धवेदान्ताचार्यापरनामधेयः विंशत्यब्दे विश्रुतनानाविधविद्यः त्रिंशद्वारं श्रावितशारीरकभाष्यः कवितार्किककरिवरकण्ठीरवो भगवत्समाराधनोपयुक्तघण्टावतार इति बुधजनोत्प्रेक्षणीयवैभवः अष्टोत्तरशतप्रबन्धप्रकाशित-परावरतत्त्वयाथात्म्यः श्रीमान् वेङ्कटनाथदेशिकः प्रपन्नजनसार्थं कृतार्थयितुं प्रपत्त्यधिकारहेतुभूतसदाचार्यवरणमाह-सिद्धम् इति ।

(१)

सिद्धं सत्सम्प्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम् ।
दम्भासूयादिमुक्तं जितविषयिगणं दीर्घबन्धुं दयालुं
स्खालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥

यद्यपि वेदान्ताचार्यप्रणीतमेव व्याख्यानं तत्र तत्र विद्यते, तस्य दुर्ग्रहार्थत्वात् कात्स्न्र्येन श्लोकार्थकथनाभावाच्च तदनुसारेणैव यथासम्प्रदायं व्याख्यास्यत इत्यर्थवानेवायमस्मदारम्भः । ''आचार्यवान् पुरुषो वेद ''.

''पापिष्ठः क्षत्रबन्धुश्च पुण्डरीकश्च पुण्यकृत् ।
आचार्यवत्तया मुक्तौ तस्मादाचार्यवान् भवेत् ॥''

इत्यादिवचनानुसारात् आचार्यवरणं च शास्त्रसिद्धम् । तत्र आचार्यलक्षणान्याह-सिद्धमिति । सत्सम्प्रदाये=सतां= यामुनादीनाम् आचार्याणाम् सम्प्रदाये=परम्परायां सिद्धम् । यद्वा, सम्प्रदीयते गुरुणा शिष्यायेति सम्प्रदायशब्देन रहस्यजातमुच्यते । तत्र सिद्धः सदाचार्योक्तरहस्यज्ञानवान् इति केचित् । सत्कुलप्रसूतो वा । तदुक्तम् -

''सप्तपूरुषविज्ञेयसन्तत्येकान्तनिर्मले ।
कुले जातो गुणैर्युक्तो विप्रः श्रेष्ठतमो गुरुः ॥'' इति ।

एतस्मादपि प्रथमपक्ष एव वरः । उत्तरत्र 'स्वयं वा भक्तिसम्पन्नः' इत्युक्तत्वात् सत्कुलप्रसूतत्वं प्रायिकाभिप्राय एव । स्थिरधियम्=ज्ञातव्यार्थेषु निश्चितबुद्धिम् । ज्ञानस्य स्थिरत्वं नाम – संशयविपर्ययराहित्यम् । अनघमित्यनेन अभिशस्तपतितादीनाम् अनधिकारः सूच्यते । श्रोत्रियम्-श्रुतवेदान्तम् । "विद्वानेकां शाखाम् अधीत्य श्रोत्रियः" इति वचनात् व्रात्यादीनामनधिकारो द्योत्यते । श्रुतवेदान्तत्वेऽपि अब्रह्मनिष्ठा बहवो दृश्यन्ते । ततो वैषम्यमाह–ब्रह्मनिष्ठम् इति । उपायोपेयत्वेन ब्रह्म स्वीकृतवन्तम् इत्यर्थः। अनेन कामकामिनः साधनान्तरनिष्ठाश्च व्यावृत्ताः । सत्त्वस्थम्-सत्त्वगुणायत्तसम्यग्ज्ञानपूर्णम् । सत्यवाचम् – इति भ्रान्त-विप्रलम्भकादिव्यावृत्तिः । समयनियतया-सदाचारनियतया । दम्भः=ख्यातिलाभपूजार्थम् पराश्चर्यकरवेषधारणम् । असूया=गुणेषु दोषारोपणम् । आदिशब्देन अहंकारममका रक्रोधलोभ-मदमात्सर्यादिकमुच्यते । जितविषयिगणम्–वशीकृतज्ञानकर्म - रूपैकादशेन्द्रियम् । अनेन विषयलोलुपस्या नधिकारो दृष्टः । दीर्घबन्धुम्-अनेन ख्यातिसहवासार्थशिष्य परिग्रहीतारो व्यावृत्ताः । अत्र परत्र चापि इति मुक्तावपि प्राप्यत्वमभिप्रेत्य वा दीर्घबन्धुं इत्युक्तम् । दयालुं-निर्हेतुककृपाप्रवाहभरितम् । स्वार्थनिरपेक्षत्वे सति परदुः खनि राचिकीर्षा हि कृपा । स्खालित्ये शासितारम्- पमादेन शिष्यस्य विषयादिप्रावण्ये सति एवम् मा कार्षीः एवम् कुरु इति नियन्तारम् । स्वपरहितपरम्-स्वस्य आचार्यस्य (?) परस्य शिष्यस्य

च हिते परं निरतम् । स्वस्य आत्मनः=परस्य शिष्यस्य च हितपरम् वा । अथवा,स्वशब्देन स्वयं च स्वः स्वजनः शिष्य इति च उभयोरपि परहितं–उत्कृष्टहितम् निःश्रेयसम्, तन्निरतम् इति वा । देशिकम्– आचार्यम्, भूष्णुः– वर्धिष्णुः ईप्सेत् अभिगच्छेत । ईप्सेदिति सन्प्रयोगेन नियमविधिःद्योत्यते। सम्यग् ज्ञानार्थं रागतः प्रवृत्तस्यापि ''गुरुमेवाभिगच्छेत्'' इतिवत् पूर्वोक्तगुणविशिष्टम् आचार्यमेवाभिगच्छेत् । न पुस्तकनिरीक्षणादिना सम्पादनीयं सम्यग्ज्ञानम् इत्यर्थः ।

''प्रपित्सुः मन्त्रनिरतं प्राज्ञं हितपरं शुचिम् ।
प्रशान्तं नियतं वृत्तौ भजेद् द्विजवरं गुरुम् ।।

विश्वात्मन्यात्मनो न्यासम् धिया वृत्तिं च शाश्वतीम् ।
मन्त्रेणोच्चारयेद् यस्तु स आचार्यः परो मतः ।।

त्रिषु वर्णेषु सम्भूतो मामेव शरणं गतः ।
नित्यनैमित्तिकपरो मदीयाराधने रतः ।।
आत्मीयपरकीयेषु समो देशिक उच्यते ।।''

इत्यादीन्यत्र प्रमाणानि द्रष्टव्यानि । अत्र वर्ज्यान् आह ।

तथा भारद्वाजः

''नाचार्यः कुलजातोऽपि ज्ञानभक्त्यादिवर्जितः ।
न च हीनवयोजातिप्रकृष्टानामनापदि ।।

न जातु मन्त्रदानादि न शूद्रो नान्तरोद्भवः ।
नाभिशस्तो न पतितः कामकामोऽप्यकामनः ॥

शूद्रादयः स्त्रियश्चापि बोधयेयुः हिताहितम् ।
यथार्हं माननीयाश्च नार्हन्त्याचार्यतां क्वचित् ॥'' इति ।

हीनवयस्कत्वाभिधानं च प्रायिकम् । तथाह मनुः-

''अध्यापयामास पितॄन् शिशुराङ्गीरसः कविः ।
पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥

ते तमर्थमपृच्छन्त देवान् आगतमन्यवः ।
देवाश्च तान् समेत्योचुः न्याय्यं वश्शिशुरुक्तवान् ॥

बालोऽपि विप्रो वृद्धस्य पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव हि मन्त्रदः ॥

न हायनैः न पलितैः न च वित्तैः न बान्धवैः ।
ऋषयः चक्रिरे धर्मं योऽनूचानः स नो महान् ॥

विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः ।
वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः ॥''

न चापद्विषयं कल्पयितुम् अत्रापि युक्तम् । पूर्वापरपर्यालोचनायां तादृशशब्दाश्रवणात् । ''विप्राणां ज्ञानतो ज्यैष्ठ्यम्'' इति

व्यवस्थाविरोधात्। आश्रमान्तरप्राप्तस्य हीनवयस्कस्यापि अत्यादरेण विशिष्टैः आचार्यत्वेन वरणदर्शनाच्च। निहीनजातिवचनम्,

''किमप्यत्राभिजायन्ते योगिनः सर्वयोनिषु।

प्रत्यक्षितात्मनाथानां नैषां चिन्त्यं कुलादिकम्'' इति वचनसिद्धव्यतिरिक्तविषयम्॥

(२)

एवम् आचार्यवरणे सिद्धे ''देवमिव आचार्यं उपासीत।'' ''मन्त्रनाथं गुरुं मन्त्रं समत्वेनाभिबीक्षयेत्'' इत्यादिवचनविहितं आचार्यसेवनमाह -

अज्ञानध्वान्तरोधादघपरिहरणादात्मसाम्यावहत्वात्

जन्मप्रध्वंसिजन्मप्रदगरिमतया दिव्यदृष्टिप्रभावात्।

निष्प्रत्यूहानृशंस्यात् नियतरसतया नित्यशेषित्वयोगात्

आचार्यः सद्भिरप्रत्युपकरणधिया देववत् स्यादुपास्यः॥

अज्ञानेति। अज्ञानमेव ध्वान्तम्=अन्धकारः। तस्य रोधात्=निवारणात्। ''अहमज्ञानजं तमः। नाशयामि'' इति अज्ञाननाशकत्वं तावत् ईश्वरस्य सुप्रसिद्धम्।

''गु- शब्दस्त्वन्धकारः स्यात् 'रु' शब्दः तन्निरोधकः। अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते'' इति गुरोरपि सिद्धम्।

अघपरिहरणात् ;''हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः'' इत्यादिना भगवतः पापनिर्हरणत्वं सिद्धम् । पापिष्ठस्यापि क्षत्रबन्धोः आचार्यवरणेन सिद्धे आचार्यस्यापि तत् सिद्धम् । आत्मसाम्यावहत्बात् - ''निरञ्जनः परमं साम्यमुपैति'' ''मम साधर्म्यम् आगताः'' ''आत्मभावं नयत्येनं तद् ब्रह्म ध्यायिनं मुने'' इत्यादिभिः स्वसाम्यावहत्बम् ईश्वरस्य सिद्धम् । ''एष हि एव साधुकर्म कारयति'' इति ईश्वरस्यैव उपायानुष्ठानादिप्रवर्तकत्वात् । आचार्यस्य स्वात्मवत् शिष्यस्य ज्ञानादिजननद्वारा भगवद्विषयी-कारार्हत्वजनकत्वेन साम्यावहत्वं युक्तमेव । जन्मप्रध्वंसि-जन्मप्रदगरिमतया - जन्मप्रध्वंसिजन्म= संसारबन्धोच्छेदकनिः-श्रेयसम् । तत्प्रदगौरवेणेति ईश्वरपक्षे सुस्पष्टम् । आचार्यपक्षे तु जन्मप्रध्वंसिजन्म=विद्याजन्म । ''स हि विद्यातस्तं जनयन्ति'' इत्युक्तत्वात् । दिव्येति । ईश्वरस्य दिव्यदृष्टिप्रभावो नाम-सत्त्वोद्रेकमोक्षरुचिजनकत्वादिकम् । यद्वा, '' स ईक्षत, तदैक्षत''इति श्रुतिसंपन्न सृज्यवस्तुविषयसाक्षात्कारः । अयमपि करणकलेबरादिप्रदानादिद्वारा समाश्रयणोपयुक्त एव । आचार्ये तु बालमूकादीनां भगवत्प्राप्तिसाधकत्वं दिव्यदृष्टिस्वभावः । तदुक्तम् - ''बालमूकजडान्धाश्च पङ्गवो बधिरास्तथा ।

सदाचार्येण संदृष्टाः प्राप्नुवन्ति परां गतिम् ॥'' इति ।

निष्प्रत्यूहानृंशस्यात् । आनृंशस्यम्=कृपा । तस्य निष्प्रत्यूहत्वं नाम-

सर्वज्ञत्वा-ज्ञत्वसुरनरतिर्यगादिविषयविभागमन्तरेण सर्वतः स्वरसवाहित्वम्। ''वधार्हमपि काकुत्स्थः कृपया पर्यपालयत्'' इति हि उक्तम्। ''प्रसन्नः कृपया वदेत्'' इति आचार्यस्यापि कृपायोगः स्पष्टः। नियतरसतया= ''रसो वै सः'', ''आनन्दो ब्रह्म'' इति निरतिशयभोग्यत्वम् ईश्वरस्य श्रुतिसिद्धम् इत्यर्थः। तथा च आचार्यस्यापि ''अत्र परत्र चापि'' इति प्राप्यत्ववचनात्। नित्येति - स्फुटः प्राप्यत्वे हेतुरुक्तः। अप्रत्युपकरणधिया=प्रत्युपकार-राहित्यज्ञानेन। ''ब्रह्मविद्याप्रदानस्य देवैरपि न शक्यते। प्रतिप्रदानम्; अथवा दद्यात् शक्तित आदरात्'' इत्युक्तत्वात्। ''अथवा विद्यया विद्या'' इत्यादिकमपि विद्यान्तरविषयमित्यभिप्रेत्य ब्रह्मविद्येत्युक्तम्। अस्मदादीनां प्रतिप्रदानसामर्थ्याभावे शक्तिमत्त्वमुपपन्नमित्यत उक्तम् ''देवैरपि'' इति। अपिशब्देन, ईश्वरेणापीति द्योत्यते। तर्हि ''गुरवे दक्षिणां दद्यात्'' इति दक्षिणादानवचनमनुपपन्नं स्यात्, इत्यत उक्तम् ''शक्तित'' इति। तत्रापि न प्रत्यर्पणधिया देयमिति भावः। विधिविहितत्वेऽपि प्रीतिपूर्वकमेव देयमित्याह– 'आदरात्' इति। ''देववत्'' इति वत्करणेन

''आचार्यः स हरिः साक्षात् चररूपी न संशयः ॥,
साक्षात् नारायणो देवः चररूपी न संशयः।
(कृत्वा मर्त्यमयी तनुम् ?)
मग्नान् उद्धरते लोकान् कारुण्यात् शास्त्रपाणिना ॥''

इत्याद्यैक्यवचनं निर्व्यूढम् । तथा च आचार्यवैभवं शास्त्राणि च प्रतिपादयन्ति-

‘‘गुरुरेव परं ब्रह्म गुरुरेव परं धनम् ।
गुरुरेव परः कामो गुरुरेव परायणम् ॥

गुरुरेव परा विद्या गुरुरेव परा गतिः ।
अर्चनीयश्च वन्द्यश्च कीर्तनीयश्च सर्वदा ॥
ध्यायेत् जपेद् नमेत् भक्त्या भजेद् अभ्यर्चयेन्मुदा ॥

उपायोपेयभावेन तमेव शरणं व्रजेत् ।
यो विष्णौ प्रतिमाकारे लोहभावं करोति यः (ना) ।

यो गुरौ मानुषं भावमुभौ नरकपातिनौ ।
आचार्यस्य प्रसादेन मम सर्वमभीप्सितम् ॥

प्राप्नुयामिति विश्वासः यस्यास्ति, स सुखी भवेत् ।
येनैव गुरुणा यस्य सम्यग् (न्यास) विद्या प्रदीयते ॥

तस्य वैकुण्ठदुग्धाब्धिद्वारकाः सर्व एव सः ।
ऐहिकामुष्मिकं सर्वम् अष्टाक्षरप्रदो गुरुः ॥

इत्येवं ये न मन्यन्ते त्यक्तव्यास्ते मनीषिभिः ।
एकाक्षरप्रदातारं आचार्यम् अवमन्यते ॥
शुनां योनिशतं प्राप्य चण्डालेष्वभि(पि)जायते’’ ॥

इत्यादि सम्यगुपसन्ने सच्छिष्ये ।

''तस्मै स विद्वानुपसन्नाय सम्यक्

प्रशान्तचित्ताय शमान्विताय ।

येनाक्षरं पुरुषं वेद सत्त्यं

प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥''

इति श्रुतिविहितम् आचार्यस्य कृत्यं अभिविधित्सुः तत्र शिष्यलक्षणमाह – सद्बुद्धिरिति ।

(३)

सद्बुद्धिः साधुसेवी समुचितचरितस्तत्त्वबोधाभिलाषी
शुश्रूषुस्त्यक्तमानः प्रणिपतनपरः प्रश्नकालप्रतीक्षः ।
शान्तो दान्तोऽनसूयुः शरणमुपगतः शास्त्रविश्वासशाली
शिष्यः प्राप्तः परीक्षां कृतविदभिमतं तत्त्वतः शिक्षणीयः ॥

सद्बुद्धिः- सम्यग्बुद्धिः । सम्यग्ज्ञानवान् । साधुसेवी= भागवतान् आचार्यतुल्यत्वेन स्वेश्वरसंसार्यधिकत्वेन ज्ञात्वा तत्सेवापरः । समुचितचरितः=स्ववर्णाश्रमनियताचारपरः । तत्त्वबोधाभिलाषी - स्वरूपसाधनपुरुषार्थविषय-सम्यग्ज्ञानमाकाङ्क्षमाणः [आकाङ्क्षन् ?] । शुश्रूषुः = उदकेन्धनपुष्पादिभिः असकृत् आचार्यं तर्पयन् । त्यक्तमानः = परच्छन्दसाऽनुवर्तनानि कथं कुर्यामिति अभिमानवर्जितः ।

प्रणिपतनपरः - तत्तदुचितकालनियतप्रणिपातनमस्कारनिरतः । ''प्रणिपत्याभिवाद्य च'' इति वचनात् । प्रश्नकालप्रतीक्षः =प्रश्नकरणोचितकालमाकाङ्क्षमाणः (आकाङ्क्षन्?) । शान्तः- प्रशान्तमनस्कः । दान्तः=विषयविनिवर्तितबाह्येन्द्रियः । अनसूयुः= असूयारहितः । शिष्टश्रेयोऽर्थिसब्रह्मचारिषु गुणेषु च दोषाविष्करणं अकुर्वन् । शरणमुपगतः =आचार्यस्य गृहं प्राप्तः । गृहमिति तत्समीपस्य उपलक्षणम् । शास्त्रविश्वासशाली= वेदवेदान्तसा–त्त्विकस्मृतीतिहासपुराणदिव्यशास्त्राचार्योक्तिषु अत्यन्तविश्वासयुक्तः परीक्षां प्राप्तः - संवत्सरषण्मासमासत्रयैः सम्यक् परीक्ष्य विज्ञातशीलः । कृतवित् - अनादिकालार्जितपुण्यपापवशात् नित्यसंसारिणं माम् अस्पृष्टसंसारगन्धानन्तगरुडविष्वक्सेनादिनि–त्यसूरिसेवितपरब्रह्मानुभवयोग्यं कृतवान् इति सदाचार्ये ईश्वरे च कृतज्ञः। एवंभूतः शिष्यः । अभिमतं =मोक्षोपयुक्तमर्थजातं आचार्येण संशयविपर्ययनिरासपूर्वकं सम्यक् शिक्षणीयः । अत्र प्रमाणानि-

''आस्तिको धर्मशीलश्च शीलवान् वैष्णवश्शुचिः ।
गम्भीरश्चतुरो धीरः शिष्य इत्यभिधीयते ॥''

''शान्तोऽनसूयुः श्रद्धावान् गुर्वर्थात्मप्रवृत्तिकः ।
शुचिः प्रियहितो दान्तः शिष्यश्चोपरतः सुधीः ॥''

इत्यादीनि द्रष्टव्यानि । तथा वर्ज्याश्च ।

''न मत्तोन्मत्तपतिताभिशस्तक्रूरनास्तिकाः ।
नानार्थिनो (?) न चाज्ञाताः त्यक्तव्या मन्त्रगामिनः
(दायिनः) ॥'' इति

(४)

मुमुक्षोः अधिकारिणः मूलमन्त्राद्यभिप्रेतं ज्ञातव्यमर्थं तस्य नित्यानुसन्धेयत्वं च प्रतिपादयति-स्वाधीनेति ।

स्वाधीनाशेषसत्तास्थितियतनफलं विद्धि लक्ष्मीशमेकं
प्राप्यं नान्यं प्रतीयाः, न च शरणतया कञ्चिदन्यं वृणीयाः ।
एतस्मादेव पुंसां भयमितरदपि प्रेक्ष्य मोज्झीस्तदाज्ञाम्
इत्येकान्तोपदेशः प्रथममिह गुरोरेकचित्तेन धार्यः॥

स्वशब्देन ईश्वर उच्यते । अशेषचेतनाचेतनानां स्वरूप-स्थितिप्रवृत्तयःफलं च भगवदधीनम् इत्यर्थः । अनेन मूलमन्त्रार्थः उक्तः । प्रणवेन अनन्यार्हशेषत्वम् उक्तम् । शेषत्वमेव हि ज्ञानानन्दौ बहिर्दलौ कृत्वा स्वयमात्मनः अनन्तरङ्गम् भवति । स एव सत्ताशब्देन उच्यते । ''अहं न मम, भगवत एव अहमस्मि'' इति अहंकारममकारनिवृत्तिः नमश्शब्दार्थः । तेन पारतन्त्र्यं सिद्धम् । एतच्च स्थितेः तादधीन्यप्रतिपादनेन सिद्धम् । ''नारायण'' शब्देन सर्वस्य भगवच्छरीरत्वप्रतिपादनात्, तस्य आत्म(उत्तम) त्वप्रतिपादनाच्च, प्रवृत्तिरपि तदधीनेति सिद्धा । अत एव चतुर्थीप्रतिपादितकैङ्कर्य-रूपफलस्यापि तादधीन्यं प्रतिपादितम् ।

'नारायण' - शब्दस्य कर्मधारयव्युत्पत्तौ अयनशब्दस्य ''ईयत इति अयनम्'' इति व्युत्पत्तिसिद्धमर्थमाह–प्राप्यमिति । ''वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः'' इति वचनार्थमाह-लक्ष्मीशमिति । यद्वा, द्व्यार्थ उच्यते । ''प्राप्यं लक्ष्मीशम्'' इति लक्ष्मीविशिष्टस्य प्राप्यत्वे ''ब्रह्मविदाप्नोति परम्'' इति श्रुतिः विरुध्यत इत्यत उक्तम् – एकम् इति । ''एकमपि उभयम्'' इति न्यायेन आधेयाधिष्ठानरूपस्वरूपभेदेऽपि विशिष्टद्योतकत्वात् अविरोध इति भावः । अत्रार्थसिद्धमाह- नान्यमिति । प्राप्यमिति अनुषज्यते । नमश्शब्दस्य वृत्त्या सिद्धमर्थमाह– न चेति एतस्मादिति त्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिहेतुभूतम् । भयजनकत्वात् भयमिति संसार उच्यते । यद्वा, अकृत्यकरणादौ मृत्स्नालोलुपार्भकजिह्वाङ्कनवत् ईश्वरः भयम् उत्पादयति इति । इतरत्= मोक्षम् सुखम् वा । प्रेक्ष्य । शास्त्रेणेति शेषः । तदाज्ञाम्=श्रुतिस्मृती । मोज्झीः= न त्यजेथाः । तदुक्तम् -

''श्रुतिस्मृती ममैवाज्ञा यस्ताम् उल्लङ्घ्य वर्तते । आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ।।'' इति । ''एवं विलङ्घयन् मर्त्यो मर्यादां वेदनिर्मिताम् । प्रियोऽपि न प्रियो मेऽसौ मदाज्ञाव्यतिवर्तनात्'' इति (च) । भगवदप्रीत्या पापेनानर्थफलम् आपद्यत इति भावः । अनेन सर्वधर्मत्याग उक्त इति चरमश्लोकार्थोऽपि विवक्षितः । इतिशब्दः प्रकारवाची । एवम् नियतोपदेशः सदाचार्योपदेशात् एकाग्रचित्तेन प्राथम्येन अवधार्य इत्यर्थः । एतदेव तत्त्वज्ञानं प्राधान्येन सद्भिः =मुमुक्षुभिः अवधार्यम्

एतस्य शास्त्रमुखेन अवगमादपि उपदेशेन अवगमो ज्यायानिति ज्ञापयितुं गुरोरित्युक्तम् । तदुक्तम्-

"शास्त्रज्ञानं बहुक्लेशं बुद्धेः चलनकारणम् । उपदेशाद्धरिं बुद्ध्वा विरमेत् सर्वकर्मसु ॥" इति । धार्य इति - समुत्पन्नभगवच्छेषत्वादिज्ञानस्येदमेव सर्वदा मननयोग्यम् इत्यर्थः । अत एव अस्मिन्नेवेति क्रमेण एतद्ज्ञानात् पूर्वं स्वात्मानम् अलभमानाः सन्तः आचार्यमूलमन्त्रादिना संपादिते ज्ञाने एतन्मननव्यतिरेकेण अन्येन कालक्षेपं न कुर्वन्तीति अनुसन्धेयम् ॥

(५)

एवंविधोपदेशलब्धतत्त्वज्ञानस्य मोक्षसाधनतया विहितयोः भक्तिप्रपत्त्योः अधिकारव्यवस्थामाहमोक्षेति ।

मोक्षोपायार्हतैवं भवति भवभृतां कस्यचित् क्वापि काले
तद्वद् भक्तिप्रपत्त्योरधिकृतिनियमस्तादृशा स्यान्नियत्या ।
शक्ताशक्तादितत्तत्पुरुषविषयतः स्थाप्यते तद्व्यवस्था
यच्चाहुस्तद्विकल्पः सम इति कतिचित्, तत् फलस्याविशेषात् ॥

भवभृतां - संसारिणं । कस्यचित्=पुरुषस्य मोक्षोपायस्य वा अर्हत्वम् एवं भवति । "कृपा क्वापि उपजायते" इतिवत् निदानभूतमदृष्टं निरूपयितुं न शक्यमित्यविद्याकर्मवासना-रुचिप्रकृतिसम्बन्धरूपघटीयन्त्रपरवशस्य "पङ्गोरुपरि गङ्गापतनवत्"

एतादृशाद्भुताकारः सम्पन्नः इति अनुसन्धत्ते-एवं भवति इति। हेतुनियमाभावादेव कालनियमोऽपि नास्तीत्याह– कापीति । तर्हि सर्वेऽपि भक्तौ प्रपत्तौ वा कथं नियमेन न प्रवर्तन्त इत्यत आह-तद्वदिति । तद्वत्मोक्षोपायार्हत्ववत् । अधिकृतिनियमः– अधिकारनियमः, तादृशा–तत्तदनुगुणस्वभावया। नियत्या अदृष्टेन। तत्तदनुगुण-स्वभावत्वम् च कार्यैकसमधिगम्यम् । ''सकृदेव हि शास्त्रार्थः'' ''आवृत्तिरसकृदुपदेशात्'' इति सकृत्कर्तव्यतया असकृत् कर्तव्यतया च सिद्धयोः गुरुलघूपाययोः अधिकारनियम कथं संपद्यत इत्यत आह–शक्तेति । आदिशब्देन विलम्बक्षमतदक्षमौ गृह्येते । तद्व्यवस्था-भक्तिप्रपत्त्योः विकल्पव्यवस्था । नन्वेवं किमधिकारिभेदेन व्यवस्था क्रियते ? ''भक्त्या परमया वाऽपिप्रपत्त्या वा महामुने'' इति उभयोः समप्राधान्य वाश्रवणात् समविकल्प एव कार्य इत्यत्राह–यच्चाहुः । इति तद्विकल्पः तयोः– भक्तिप्रपत्त्योः विकल्पः । परमपुरुषार्थफलस्य अविशिष्टत्वात् । अयं भावः– गुरुलघुविकल्पोऽनुपपन्नः । नियमेन लघावेव प्रवृत्तिसम्भवात्। गुरूपाये कस्यापि मतिः नावतरतीति तस्याननुष्ठानलक्षणम् अप्रामाण्यं प्रसज्येत इत्यतः समावर्तनवत् व्यवस्थितविकल्प एव कार्य इति ॥

(६)

एवं शक्त- अशक्त - अधिकारभेदेन गुरुप्रलघूपाययोः विकल्प उक्तः । इदानीं प्रपत्तिवैभवे सन्दिहानान् समाधत्ते –

सानुक्रोशे समर्थे प्रपदनमृषिभिः स्मर्यतेऽभीष्टसिद्ध्यै
लोकेऽप्येतत् प्रसिद्धं नच विमतिरिह प्रेक्ष्यते क्वापि तन्त्रे।
तस्मात् कैमुत्यसिद्धं भगवति तु भरन्यासविद्यानुभावं
धर्मस्थेयाश्च पूर्वे स्वकृतिषु बहुधा स्थापयांचक्रुरेवम् ॥

सानुक्रोशे–कृपासहिते, समर्थे–शरणागतकार्यकरणसमर्थे, ऋषिभिः–वाल्मीकिप्रमुखैः अभीष्टसिद्ध्यै इत्यनेन फलनियमो वारितः । कृपावतोऽपि शक्त्यभावे रक्षकत्वं नास्ति । शक्तस्यापि निर्घृणत्वरक्षत्वं नास्तीति सानुक्रोशादिपदयोः उपादानम् । स्मर्यते हि ''सतं निपतितं भूमौ शरण्यः शरणागतम् । वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥'' इति । ''त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणः गतः'' ''सकृदेव प्रपन्नाय'' ''गोविन्द पुण्डरीकाक्ष रक्ष मां शरणा- गतम्'' इत्यादिभिः अशक्तादिविषये प्रपदनं तदनुरूपफलं च । तस्मान्न विमतिः कार्येति तात्पर्यम् । प्रपदनं तस्य फलाबिनाभा- वश्चालोके सिद्धमित्याह–लोकेऽपीति । शास्त्रान्तरेऽपि सिद्धमित्याह न चेति । व्यतिरेकमुखेनाह न चेति । यद्वा तन्त्रे = शास्त्रे फलविषये उपायविषये वा विमतिः इत्यर्थः । क्वापि–कस्मिन्नपि प्रदेशे । अल्प शक्त्यादियुक्ते क्रियमाणस्य प्रपदनस्य कार्थकरत्वे, भगवति तु किमु वक्तत्व्यमित्याह–तस्मात् इति । कैमुत्यसिद्धं–किमुतेति न्याय-सिद्धम् । भगवति = हेयप्रतिभटे, ज्ञानशक्त्यादिगुणपरिपूर्णे । तदुक्तम्

–''ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैः गुणादिभिः ॥'' इति । भरन्यासविद्यानुभावम् – हरौ आत्मीयभरस्य न्यासः= निक्षेपः, स एव विद्या,= ज्ञानम् । तस्य प्रभावम् इत्यर्थः ।

धर्मस्थेयाः–विवादगोचरधर्मनिर्णेतारः भगवद्यामुनभाष्यकृ – त्प्रमुखाः । ''अकिञ्चिनोऽनन्यगतिश्शरण्य'' 'त्वदङ्घ्रिमुद्दिश्य कदाऽपि' ''अनन्यशरणः शरणमहं प्रपद्ये'' ''पापीयसोऽपि शरणगतशब्दभाजो नोपेक्षणं मम तवोचितमीश्वरस्य'' इत्यादिभिः स्वग्रन्थेषु प्रपत्तितत्फले प्रतिपादितवन्तः इत्यर्थः ।

(७)

एवं विप्रतिपत्तिपरिहारः कृतः । शास्त्रविश्वासोऽपि जातः । सर्वशास्त्रप्रवृत्तावपि विश्वासोऽपेक्षितः । किमर्थं प्रपत्तिप्रकरणे ''महाविश्वासपूर्वकम्'' इति विश्वासविशेषणतया महत्त्वोपादानमित्यत्राह – शास्त्रेति ।

शास्त्रप्रामाण्यवेदी ननु विधिविषये निर्विशङ्कोऽधिकारी
विश्वासस्याङ्गभावे पुनरिह विदुषा किं महत्त्वं प्रसाध्यम् ? ।
मैवं घोरापराधैः सपदि गुरुफले न्यासमात्रेण लभ्ये
शङ्का पार्ष्णिग्रहार्हा शमयितुमुचिता हेतुभिस्तत्तदर्हैः ॥

ननु शास्त्रोक्तं सर्वमुपपन्नमिति जानानः अधिकारी

शास्त्रविषये शङ्कारहितो वा। एवं जानता विश्वासस्य प्रपत्त्यङ्गभावे सिद्धे पुनरपि तद्विशेषणतया महत्त्वं किमर्थं साध्यत इति शङ्कास्वरूपमुक्तम्। उपपत्तिबाहुल्यात् महत्त्वविशेषणेन तन्निरासः क्रियत इत्याह–मैवम् इति । घोरापराधैः –पूर्वाघादिबहुविधत्वात् दुस्तरत्वात्, अत्यन्तनिर्मलस्य आत्मनो नित्यसंसारापादकत्वाच्च घोरत्वं पापानाम् उच्यते । सपदि – इदानीम्, एतद्देहावसाने वा। गुरुफले– विधिशिवसनकादिभिः ''इदम् एतावत्''इति ज्ञातुमपि अशक्ये: कर्माद्यनवरतनिरतपरमयोगिभिः अगम्ये वा। न्यासमात्रेण लभ्ये - कर्माद्यङ्गनिरपेक्षानुकूल्यादिमात्रविशिष्टक्षण–मात्रसाध्योपायरहितप्रपत्त्या साध्य इत्यर्थः । पार्ष्णिशब्देन पादस्य अपरभागः उच्यते। तस्य ग्रहः – ग्रहणम्। तत्रार्हा विमर्शमन्तरेण प्रतिपादनवेलायामेव सञ्जातेत्यर्थः। तत्तदर्हैः इति ।

''विदितः स हि धर्मज्ञः शरणागतवत्सलः ।''

''मित्रभावेन संप्राप्तं न त्यजेयं कथञ्चन।
दोषो यद्यपि तस्य स्यात् सताम् एतदगर्हितम् ॥'' इति प्रणतजनदोषादर्शित्वेनैव स्वदोषभूयस्त्वनिमित्तशङ्का न कार्या। ''सकृदेव प्रपन्नाय तवास्मीति च याचते ।

अभयं सर्वभूतेभ्यः ददाम्येतद् व्रतं मम ॥'' इति, ''अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन, रामो द्विर्नाभिभाषते'' इति

प्रसिद्धसत्यवचनभगवत्प्रतिपादितत्वात् न उपायविषये फलविषये च शङ्का कार्या । तस्मात् विश्वासप्रकर्षः सम्पाद्य इति तात्पर्यम् ।

(८)

ननु महाविश्वासप्रतिपादनेन प्रपत्तेरपि दुष्करत्वं ज्ञातम्, किमनेन क्रियते ? ''सकृज्जप्तेन मनुना कृतकृत्यः सुखी भवेत्'' इति शरणागतिमन्त्रोच्चारणमात्रेणैव फलसिद्धिः भविष्यति इत्यत आह – नेहेति ।

नेहाभिक्रान्तिनाशो न च विहतिरिह प्रत्यवायो भवेदि–
त्युक्तं कैमुत्यनीत्या प्रपदनविषये योजितं शास्त्रविद्भिः ।
तस्मात् क्षेत्रे तदर्हे सुविदितसमयैर्देशिकैः सम्यगुप्तं
मन्त्राख्यं मुक्तिबीजं परिणतिवशतः कल्पते सत्फलाय ।।

इह = कर्मणि, अभिक्रान्तिनाशो नास्ति – उपक्रमनाशो नास्ति, अनभिसंहतिफलेनानुष्ठीयमानत्वात् उपक्रान्तस्य समाप्त्यभावे फलजननासमर्थकर्मवत् एतत्प्रक्रमस्य न तथात्वम् इत्यर्थः । न च इति । कर्मान्तरस्य अन्तरस्यान्तरितत्वे विपरीतफलराक्षसत्वादिप्राप्तिः भवति । एतस्य अन्तराये सति कालान्तरे देहान्तरे वा समाप्य फलजनकत्वेन प्रत्यवायाभाव इत्यर्थः । ''नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ।।'' इति कर्मप्रयोगप्रकरण इति शेषः । शास्त्रविद्भिः– प्रपत्तिप्रभावप्रतिपादकशास्त्रार्थविद्भिः ।

अत्यन्तबहिर्भूते कर्मयोगेऽपि एतदृशवैभवस्वभावे सति, अत्यन्तान्तरङ्गप्रपत्तौ किमु वक्तव्यमिति प्रपत्तिप्रभावपर्यालोचनया अस्यामपि योजितम् ।

''बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ।

सकृदुच्चारितं येन हरिरित्यक्षरद्वयम् ॥'' इत्यत्र भगवन्नामसङ्कीर्तनस्य मोक्षगमनहेतुभूतोपायपरिकरत्वम् ॥ तथा ''सकृत् जप्तेन मनुना कृतकृत्यः सुखी भवेत्'' इत्यत्रापि प्रपत्तिद्वारेणेति द्रष्टव्यम् । अत एव '' प्रपत्तिवाचैव निरीक्षितुं वृणे'' इति श्रीवत्साङ्कमिश्रवचनमपि गतार्थम् । एतत्सर्वं भगवच्छास्त्रे सम्यगुक्तम् – ''अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत् । मयि निक्षिप्तकर्तव्यः कृतकृत्यो भविष्यति'' इति । तदेतदाह – तस्मात् इत्यादिना । उपदेशपात्रभूते क्षेत्रनिरूपिते चेतने सुविदितसमयैः– सम्यग्विदितसिद्धान्तैः । अन्यत्र समयः–कालः । मुक्तिबीजम् । सत्फलाय– मोक्षाय, कल्पते– समर्थं भवति । सम्यगुपसन्ने सच्छिष्ये सदाचार्योपदिष्टो मन्त्रः परिणतिवशतः प्रपत्तिद्वारा मोक्षाय भवतीत्यर्थः ।

(९)

यदि प्रपत्तिद्वारा मन्त्रोच्चारणस्य मुक्तिहेतुत्वम् ? तर्हि तस्यापि भक्तिद्वारा तद्धेतुत्वम् अस्तीत्याशङ्क्याह –

न्यासः प्रोक्तोऽतिरिक्तं तप इति कथितः स्वध्वरश्चास्य कर्ता
ऽहिर्बुध्न्योऽप्यन्ववादीदगणि दिविषदामुत्तमं गुह्यमेतत् ।
साक्षान्मोक्षाय चासौ श्रुत इह तु मुधा बाधशङ्का गुणाढ्ये
तन्निष्ठो ह्यन्यनिष्ठान् प्रभुरतिशयितुं कोटिकोट्यंशतोऽपि ॥

''मुमुक्षुर्वै शरणमहं प्रपद्ये'' इति श्रुत्या पृथगेव मोक्षहेतुत्वम् प्रपत्तेः सिद्धमिदानीं दृढीक्रियत इति अपौनरुक्त्यम् । न्यासः – प्रपदनम् । अतिरिक्तम् – उत्कृष्टं तप इति तैत्तिरीयके प्रोक्तम् । तत्र हि ''सत्यं तपः शमो दानं धर्मः प्रजननम् अग्निहोत्रम् यज्ञ'' इति कर्मस्वरूपमभिधाय मानस शब्देन ज्ञानभक्ती संगृह्य न्यासशब्देन प्रपत्तिमभिधाय ''न्यास इति ब्रह्म'' इति ब्रह्मोपायत्वप्राधान्यं सामानाधिकरण्येन निर्दिश्य तदुत्कर्षेण ''तानि वा एतान्यवराणि तपाꣳसि न्यास एवात्यरेचयद्'' इति सर्वोपायाधिक्यमुक्तम् । तथोक्तम् अन्यत्रापि ''तस्मात् सत्यं परमं वदन्ति'' इत्यादिना सत्यादिवैलक्षण्य मभिधाय ''तस्माद् न्यासमेषां तपसामतिरिक्तमाहुः'' इति सर्वोपायातिरिक्तत्वं च प्रतिपादितम् (च) । तथा ऋगंशेनापि '' यः समिधा'' इत्यारभ्य ''यो नमसा स्वध्वरः'' इति । अनेन प्रपदनानुष्ठानतः स्वध्वरत्वम् । तदाह - स्वध्वर इति । एतम् ऋगर्थं शङ्करोऽपि उपबृंहितवान् इत्याह - अहिर्बुध्न्योऽपि इति । तदुक्तम्-

''समित्साधनकादीनां यज्ञानां न्यासमात्मनः । नमसा

योऽकरोद् देवे सः स्वध्वर इतीरतः ॥'' इति । दिविषदां -देवानां, एतद् - प्रपदनम्, उत्तमं गुह्यम् अगणि ''एतद् वै महोपनिषदम् देवानां गुह्यम् य एवं वेद ब्रह्मणो महिमानम् आप्नोति'' इति श्रुत्येति शेषः । एवं वचनशतप्रतिपन्नत्वात्पृथक्सिद्धसाधनत्वसर्वातिरिक्तात्वादिरूपगुणाढ्ये शङ्का व्यर्थेत्याह–साक्षादिति । साक्षात्पदेन भक्त्यङ्गत्वपक्षव्युदासः । पूर्वापरवाक्यपर्यालोचनवतां भक्तेः अप्रस्तुतत्वेन तदङ्गत्वम् न स्फुरति इति भावः। ''सत्कर्मनिरताः शुद्धाः सांख्ययोगविदस्तथा । नार्हन्ति शरणस्थस्य कलां कोटितमीमपि ॥'' इति वचनार्थमाह - तन्निष्ठ इति । तन्निष्ठः – प्रपत्तिनिष्ठः । अन्यनिष्ठान् – उपायान्तरनिष्ठान् । प्रभुः- (अतिशयितुम्) समर्थः। तन्निष्ठ इति सामान्योक्त्या प्रपत्तेः सर्वाधिकारत्वं द्योत्यते । ''सर्वलोकशरण्याय'' इति भगवतः सर्वशरण्यत्वप्रतिपादनेन तद्विषयशरणागतेः सर्वाधिकारत्वं सुस्पष्टम् । ''सा हि सर्वत्र सर्वेषां सर्वकामफलप्रदा'' ''कदापि केनचित् यथा तथा वाऽपि'' '' न जातिभेदान् न कुलं न लिङ्गं न गुणान् क्रियाः । न देशकालौ नावस्थां योगो ह्ययमपेक्षते ॥'' ''ब्राह्मणा क्षत्रविट्शूद्राः स्त्रियश्चेतरजातयः । सर्व एव प्रपद्येरन् सर्वधातारमच्युतम् ॥'' इति वचनशतान्यत्र प्रमाणत्वेन द्रष्टव्यानि । ननु ''ओम् इति आत्मानम् युञ्जीत'' इत्यात्मसमर्पणे प्रणवस्य करणत्वं श्रूयते । त्रैवर्णिकव्यतिरिक्तानां प्रणवोच्चारणनिषेधात् कथं तत्करणिका प्रपत्तिः

इति चेत् -उच्यते । अत्रैवर्णिकानां प्रणवकरणकप्रपदनाभावेऽपि तान्त्रिकत्वेनैव तदुपपद्यते । उक्तश्चायं विभागः-

''वैदिकाः तान्त्रिकाश्चैव द्वये मुख्या द्विजन्मनाम् ।
शूद्रानुलोमजातीनां मन्त्राः स्युः तान्त्रिकाः परम् ॥

भाषाख्या लौकिका मन्त्राः प्रपत्त्यर्थविभावकाः ।

सर्वेभ्यः प्रतिलोमेभ्यो देयाः कामं द्विजातिभिः ॥'' इति । इतरेषां वैदिकमन्त्रप्रदाने निन्दा च स्मर्यते ॥

''मन्त्रं नियतमग्र्याणां यो हीनाय प्रयच्छति ।

स वै हीनगुरुर्निन्द्यस्तेन सार्धं पतत्यधः ॥'' इति । प्रणवस्वरराहित्येन मन्त्रव्यत्ययेन च तान्त्रिकत्वे श्रीमदष्टाक्षरादिषु इतरवर्णाधिकारः । सर्वेषां वा एतत्परिग्रहोऽप्युपपद्यते । तदुक्तम् -

''यद्वाऽधीतक्रमापायात् स्वरादेर्वा विलोपतः ।
द्वयस्य सर्वाधिकृतिः सर्वेषां तान्त्रिकं तु वा ॥'' इति ।

ननु श्रीगीताभाष्ये 'सर्वधर्मान्' इति श्लोकव्याख्यानावसरे प्रपत्तेः भक्त्यङ्गत्वप्रतिपादनात् तत्प्रशंसापराण्येत्येतानि वाक्यानि न पृथक्साधनत्वपराणि, गुणोपसंहारपादे विद्यान्तरवदेतत्स्वा. तन्त्र्यप्रतिपादनाभावात् इत्यत्राह - नाना इति ।

(१०)

नाना शब्दादिभेदादिति तु कथयता सूत्रकारेण सम्यक्
न्यासोपासे विभक्ते यजनहवनच्छब्दभेदादभाक्तात् ।
आख्यारूपादिभेदः श्रुत इतरसमः, किं च भिन्नोऽधिकारः
शीघ्रप्राप्त्यादिभिः स्याज्जगुरिति च मधूपासनादौ व्यवस्थाम् ॥

शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयभेदात् सद्विद्यादहरविद्यावैश्वानरविद्यादीनां नानात्वम् ब्रुवता बादरायणेन समानन्यायात् प्रपदनभजने विविच्योक्ते इत्यर्थः ॥ अत्र दृष्टान्तमाह - यजनेति । यथा 'यजति' 'जुहोति' 'ददाति' इत्यादीनां भेदो मीमांसकैः कल्पितस्तथेत्यर्थः। अभाक्तात् - मुख्यात् । भाक्तमौपचारिकम् । आख्येति नामोच्यते । सद्विद्या न्यासविद्येति रूपम्–उपास्यं भगवत्स्वरूपम् । तस्य भेदो नाम सार्वज्ञ्यादिविशिष्टत्वम्; निरपेक्षरक्षकत्वादिकम् । आदिशब्देन परिकरप्रकरणयोः ग्रहणम् । इतरसमः– विद्यान्तरे आख्यारूपभेदः स्फुटः । स्वातन्त्र्यसिद्ध्यर्थम् अधिकारं भिनत्ति – किञ्चेति । भक्तौ शक्तस्याधिकारः, प्रपत्तावशक्तस्येति पूर्वमेव उक्तम् ॥

ननु यद्यपि उपास्यस्वरूपभेदेन विद्याभेदोऽस्ति, तथाऽप्येकफलसाधनसामान्यात् सर्वासां विद्यानामुपासनरूपत्वं समानमिति न्यासस्यापि तत्समानफलत्वात् तत्कोट्यन्तर्भाव एव न पृथगधिकारः स्यादित्याशङ्क्याह - शीघ्रेति । अयमर्थः- ''भोगेन

त्वितरे क्षपयित्वा अथ सम्पत्स्यते'' इति उपासकस्य प्रारब्धकर्मानुभवो विद्यते । प्रपन्नस्य अननुभूयैव विनाशश्रवणात्, प्रारब्ध-भङ्गरूपफलाधिक्ये अधिकारभेदसम्भवात् नोपासनाकोट्यन्तर्भाव इति । अयं प्रारब्धभङ्ग आदिशब्दविवक्षितः । शीघ्रप्राप्तीति तत्कार्यमुक्तम् । तत्र दृष्टान्तमाह- मध्विति । मधुविद्यायाः वसुत्वप्राप्तिपूर्वकब्रह्मप्राप्तिहेतुत्वेन फलाधिक्यात् अधिकारभेदः सिद्ध इत्यर्थः । अत एव प्रपत्तेः भक्त्यङ्गत्ववचनमपि निर्व्यूढम् । क्वचिदङ्गत्वप्रतिपादनेऽपि वचनशतसिद्धं पृथगुपायत्वं न विरुद्धम् । भाष्यकारैस्तु अतिगूढार्थतया अधिकृताधिकारात् न चरमश्लोके पृथगुपायत्वं दर्शितम् । न वा विवृतमिति भावः । अत्र शक्ताशक्ताद्यधिकारभेदं असहमानाः केचिदाहुः— यस्य विश्वासाधिक्यं सः प्रपत्तावधिकारी; यस्यायासक्षमता स भक्तावधिकारी इति । तत्रोत्तरमाचार्योक्तम् अनुसन्धीयते । अन्ये नानुमन्यन्ते । प्रपत्तिशास्त्रोपदेष्टॄणां व्यासादीनां विश्वासगौरवेऽपि स्वाधिकारानुगुणं भक्तिनिष्ठत्वात् लोकानुसाराच्च । लोके हि स्नानप्रोक्षणयोरुभयत्रापि विश्वासवन्तः पित्रादयो दुर्बलपुत्रादीन् प्रोक्षणमनुष्ठापयन्ति । स्वयं च शक्ताः स्नानमेव कुर्वन्ति । तस्मात् शक्ताशक्तत्वादिकमेव अधिकार- भेदव्यवस्थापकमिति नीतिविदां पक्षः । ''नरस्य बुद्धिदौर्बल्यात् उपायान्तरमिष्यते'' इत्यादिना भक्त्यनधिकारेऽपि प्रपत्त्यविश्वासेन भक्तिमिच्छतो दुर्लभ (दुर्बल) बुद्धीन् प्रति निन्दावचनमिति सर्वमुपपन्नमिति ॥

(११)

एवं प्रपत्तेः स्वतन्त्रोपायत्वं समर्थितम् । अथ निरङ्गत्वपक्षमाशङ्क्याह-

यत्किञ्चिद् रक्षणीयं तदवननिपुणे न्यस्यतोऽकिञ्चनस्य
प्रस्पष्टं लोकदृष्ट्याऽप्यवगमित इह प्रार्थनाद्यङ्गयोगः ।
तस्मात् कर्माङ्गकत्वं व्यपनयति परापेक्षणाभाववादः
साङ्गे त्वष्टाङ्गयोगव्यवहृतिनयतः षड्विधत्वोपचारः ॥

यत्किञ्चित् – आत्मात्मीयादिकं रक्षणीयं स्वेन रक्षितुं अशक्यत्वेन तद्रक्षणसमर्थे न्यस्यतः अकिञ्चनस्य- उपायान्तरशून्यस्य प्रस्पष्टं यथा भवति तथा लोकव्यवहारप्रार्थनाद्यङ्गयोगः अवगमितः, शास्त्रेणेति शेषः ।

''अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् ।
तदेकोपायतायाच्ञा प्रपत्तिः शरणागतिः ॥''

''अप्रार्थितो न गोपायेत् इति तत्प्रार्थनामतिः'' ।

''अहमस्म्यपराधानां आलयोऽकिञ्चनोऽगतिः ।
त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः'' ॥

''शरणागतिरित्युक्ता सा देवेऽस्मिन् प्रयुज्यताम् '' ।

''आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्'' इति, ''अङ्गसामग्र्यसम्पत्तेः अशक्तेश्चापि कर्मणाम्। अधिकारस्य चासिद्धेः देशकालगुणक्षयात् । उपया नैव सिध्यन्ति ह्यपायाः बहुलास्तदा । इति या गर्वहानिः तद् दैन्यम् कार्पण्यमुच्यते'' इत्यादिकं शरणवरणाद्यङ्गपञ्चकं प्रतिपादयतीति । लोकेऽपि एतद् भरसमर्पणे सम्भावितं च ।

ननु ''प्रपत्तेः क्वचिदप्येवं परापेक्षा न विद्यते'' इति प्रपत्तेः अन्यानपेक्षत्वात् कथं परापेक्षत्ववाद इत्याशङ्क्याह- तस्मात् इति । सामान्यतः परानपेक्षप्रतीतावपि ''निर्विशेषं नगरम् '' इत्यादिवत् अस्य परवाक्य - प्रतिपन्नाङ्गव्यतिरिक्तकर्मनैरपेक्ष्यं वक्तव्यं इति भावः । ''प्रपत्तिः अनुकूलस्य सङ्कल्पेऽ प्रतिकूलता । विश्वासो वरणं, न्यासः कार्पण्यमिति षड्विधा'' । ''षड्विधा शरणागतिः'' इत्यादिवचनं ''यदाग्नेयोऽष्टाकपालो ऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति'' इति वाक्यप्रतिपन्नप्रधानषट्कवत् आनुकूल्यस–ङ्कल्पादिकं सर्वं सम्भूयैकं करणं स्यादित्यत्राह – साङ्गे त्विति ।। यथा यमनियमासनप्राणायामप्रत्याहारधारणाध्यानानां समाध्यङ्गत्वेऽपि अष्टाङ्गयोग इति व्यवहरन्ति; एवं ''न्यासः पञ्चाङ्गसंयुतः'' इति निर्णायकवचनबलात् षड्विधत्वपक्ष औपचारिकत्वेन नेय इति तात्पर्यम्

(१२)

एवं प्रपत्तेः अङ्गित्वम्, आनुकूल्यादीनां अङ्गत्वं च सिद्धम् । इदानीं स्वयूथ्यकलहं समाधत्ते -पञ्चापीति ।

पञ्चाप्यङ्गान्यभिज्ञाः प्रणिजगुरविनाभावभाञ्जि प्रपत्तेः
कैश्चित् संभावितत्वं यदिह निगदितं–तत् प्रपत्त्युत्तरं स्यात् ।
अङ्गेष्वङ्गित्ववादः फलकथनमिह द्वित्रिमात्रोक्तयश्च
प्राशस्त्यं तत्र तत्र प्रणिदधति ततः सर्ववाक्यैककण्ठ्यम् ॥

पञ्चाप्यङ्गानि - आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम् रक्षिष्यतीति विश्वासः गोप्तृत्ववरणं कार्पण्यं चेत्येवंरूपाणि । अभिज्ञाः- प्रपत्तिशास्त्रविदः, प्रपत्तेः अविनाभावभाञ्जि - अविनाभूतानीति जगुः । एवं स्वपक्षः उक्तः । पक्षान्तरमाह - कैश्चिदिति । सम्भावितत्वमिति- नैयत्यं नास्ति इत्यर्थः । प्रपत्त्युत्तरं 'स्यात्' इति । न तावदारादुपकारकं आनुकूल्यसङ्कल्पादि सहकृतस्य प्रातिकूल्यादिसम्भवेऽपि वैकल्याभावात् तत्र प्रायश्चित्तमेव विधित्सितम् । नापि संानपत्योपकारकम्, अनङ्गीकारात्- । किञ्च प्रपदनकरणसमय यदि प्रातिकूल्यवर्जनं नास्ति । तर्हि साङ्गोपाङ्ग वैकल्यमेव स्यात् । साङ्गत्वं च प्रमाणसिद्धमिति भावः । अत्र आचार्योक्तानि अर्थजातानि अनुसन्धेयानि । प्रपत्तिदशायां प्रातिकूल्यवर्जनाद्यभावे साङ्गस्योपायस्य वैकल्यं स्यात् । पश्चात् प्रातिकूल्यसम्भवेऽपि कृतस्योपायस्य न वैकल्यम् । किन्तु प्रत्यवायान्तरं परिहारार्थं यथार्हं प्रतिविधानमेव कार्यम् । ननु प्रातिकूल्यादिसम्भवे कथं प्रपदनस्यावैकल्यमुच्यते ? ''तदा पुंसाम् अविस्रम्भात् प्रपत्तिः प्रच्युता भवेत्'' इति

विश्वासाभावेन प्रपत्तिप्रच्यावनं स्मर्यत इति चेत् - न। प्रपदनकाले विश्वासाभावेन प्रपत्तिप्रच्यावनं स्मर्यत इति अङ्गाभावात् अङ्ग्यसिद्धेः । नहि पश्चाद्भाविनः पूर्वभावित्वम् । ''राक्षसानाम् अविस्रम्भात् आञ्जनेयस्य बन्धने। यथा विगलिता सद्यस्त्वमोघाऽप्यस्त्रबन्धना ॥'' इति दृष्टान्तोऽपि अत्र यथासम्भवं योज्यः ॥ अत एव हि''उपायापायसंयोगे निष्ठया हीयतेऽनया'' इति उपायान्तरादिसंयोगस्य निष्ठाभञ्जकत्वम् उक्तम्। नतु प्रपदनस्य तत्रापि तात्कालिकोपायसंयोग एव विवक्षितम् (तः) इति वा तात्पर्यम् ऊह्यम। आनुकूल्यस्य संकल्पस्य हि प्रपत्त्यङ्गत्वम्, न सङ्कल्पितकरणस्य। अतोऽपि न प्रपत्तिहानिः। कर्मकाले 'बाढम्' इत्यादिवचनस्योपनयनाद्यङ्गत्वेऽपि न पश्चाद्भाव्यनुष्ठानस्य तदङ्गत्वम्। अङ्गेष्विति। ''त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः। शरणागतिः'' इति वचनप्रतिपाद्यशरणवरणस्याङ्गित्वकथनं फलार्थम्, न मुख्यप्रपत्तिः इति भावः। ''स विश्वासो भवेत् चक्र'' ''अनन्यसाध्ये'' इत्याद्यर्थमाह- द्वित्रीति। पूर्वोक्तमर्थमुपसंहरति- तत इति ॥

(१३)

पूर्वोक्तार्थस्थिरीकरणार्थं प्रपत्तिस्वरूपं निष्कर्षति –

रक्षापेक्षा स्वसाह्यप्रणयवति भरन्यास आज्ञादिदक्षे
दृष्टा नात्र प्रपत्तिव्यवहृतिरिह तन्मेलने लक्षणं स्यात्।

गेहागत्यादिमात्रे निपततु शरणागत्यभिख्योपचारात्
यद्वाऽनेकार्थभावाद् भवति हि विविधः पालनीयत्वहेतुः॥

स्वसाह्येति। स्वशब्देन रक्षाप्रतियोगी विवक्ष्यते। साह्यशब्देन साहाय्यम् उच्यते । स्वयं ग्रहणे सहायभूतरक्ष्ययाच्ञावति रक्षके रक्षापेक्षा ''मांरक्षेत्यपेक्षा''? इत्यर्थः । आज्ञादिदक्षे- शिक्षाकरणभृतिप्रदानादिसमर्थे। भरन्यासः - आत्मीयभरनिक्षेपः । लोके उभावपि पृथग् दृष्टौ । प्रपत्तावपि एवं अन्यतराकारता अस्तु इति आशङ्क्याह - नात्र इति । अत्र एकस्मिन् याच्ञासापेक्षाज्ञादिसमर्थविषयरक्षापेक्षापूर्वकं भरन्यास एव प्रपत्तिव्यवहार इत्याह - तदिति। ''त्रीन् लोकान् संपरिक्रम्य तमेव शरणं गतः'' इत्यादिना काकादेः शरणागत्यनुष्ठानम् दृश्यते; तत्र पूर्वोक्तं च लक्षणं न दृश्यते इत्यत आह – गेहेति। आदिशब्देन समीपागमनमुच्यते। अयमर्थः– न हि काकेन पूर्णप्रपदनमाचरितम्। गत्यन्तराभावात् पुरतः पतनमात्रं कृतम्। शरणागतिवचनं तु उपचारात् उपपद्यते। अतः पूर्णप्रपदनाभावेऽपि अदोष इति । औपचारिकमनन्वितम् इति मन्वानः पक्षान्तरमाह - यद्वेति। उपाये रक्षके वा शरणशब्दप्रयोगेन शरणशब्दस्य अनेकार्थरूढत्वात् । पालनीयत्वे विविधो हेतुर्भवति । ''बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम्'' इति गृहागतस्यापि पाल्यत्ववचनात्। 'बद्धाञलिपुटम्' इत्यादिना एकैकस्य फलसाधनत्वेऽपि न अस्माकं काचन क्षतिः । तत्र प्रपत्तिरूपत्वमेव नास्तीति सर्ववचसां निर्वाह इत्याशयः ॥

(१४)

एवं सर्वफलसाधारणप्रपत्त्याकार उक्तः । परमपुरुषार्थसाधारण-प्रपत्तौ भगवच्छेषत्वानुसन्धानादिरूपं विशेषमाह - आत्मेति ।

आत्मात्मीयस्वरूपन्यसनमनुगतं यावदर्थं मुमुक्षोः
तत्त्वज्ञानात्मकं तत् प्रथममथ विधेः स्यादुपाये समेतम् ।
कैङ्कर्याख्ये पुमर्थेऽप्यनुषजति तदभ्यर्थनाहेतुभावात्
स्वाभीष्टानन्यसाध्यावधिरिह तु भरन्यासभागोऽङ्गिभूतः ॥

आत्मा- अधिकारी । आत्मीयम् -उपायफलादि । स्वरूपन्यसनम्-न्यासः । यावदर्थम् -यावन्तोऽर्थाः प्रामाणिकाः तावतां सर्वेषाम् भगवच्छेषत्वानुसन्धानं कार्यमित्यर्थः । इदमेव मुमुक्षोः ज्ञातव्यमित्याह तत्त्वेति । ''कारणं तु ध्येयः'' इति ध्येयस्य कारणत्वप्रतिपादनात् ध्यातुश्च शेषत्वं सिद्धमिति शेषत्वज्ञानानुवृत्तिः उपासनान्वये उपपद्यते । प्रपत्तौ तु शेषत्वज्ञानपूर्वकमिति तदनुवृत्तिः । स्वतःसिद्धापुरुषार्थेऽपि अनुवृत्तिमाह – कैङ्कर्येति । अनुषजति –अनुषक्तं भवति । अनुवर्तत इत्यर्थः । किङ्करस्य कर्म कैङ्कर्यम् इत्यर्थः । तदभ्यर्थनाहेतुभावात्-तस्य = कैङ्कर्यस्य प्रार्थनारूपहेतु पसद्भावात् इत्यर्थः । शेषत्वज्ञानवत् प्रधानस्य भरन्यासस्यापि सर्वदा अनुवृत्तिः स्यादित्यत्राह – स्वेति । अङ्गिभूतः – प्रधानभूतः

भरन्यासभाग इति प्रार्थनारूपाङ्गानुवृत्तेः अङ्गिमात्रमेव अवशेषितं इत्यर्थः । स्वाभीष्टानन्यसाध्यावधि-स्वाभीष्टस्य पुरुषार्थस्य उपयान्तरासाध्ये तत्साधनतया तदवधिक इत्यर्थः । छिदिक्रियानन्तर-भाविकुठारवत्, कार्ये निष्पन्ने करणानुवृत्तिः अनुपपन्नेति भावः ॥ १४ ॥

(१५)

एवं भरन्यासे कृते ''नैवास्ति किञ्चित् कर्तव्यम्'' इति न्यायेन सर्वधर्मत्यागवचनात् वर्णाश्रमादिधर्माणां त्याग एव स्यात् इत्याशङ्क्याह – न्यासेति ।

न्यासादेशेषु धर्मत्यजनवचनतोऽकिञ्चनाधिक्रियोक्ता
कार्पण्यं वाऽङ्गमुक्तं भजनवदितरापेक्षणं वाऽप्यपोढम् ।
दुःसाधेच्छोद्यमो वा क्वचिदुपशमितावन्यसंमेलने वा
ब्रह्मास्त्रन्याय उक्तस्तदिह न विहतो धर्म आज्ञादिसिद्धः॥

आदिश्यते अनेनेति आदेशो विधिः। प्रपत्तिप्रतिपादकवाक्येषु इत्यर्थः । धर्मत्यजनवचनशब्देन ''सर्वान् (सर्व) धर्मान् परित्यज्य'' ''तस्मात् त्वम् उद्धवोसृज्य चोदनां प्रतिचोदनाम्''इत्यादीनि वचनानि विवक्षितानि । तेषां तात्पर्यमाह-अकिञ्चनेति । अकिञ्चनानां अधिकार उक्तः, न तु धर्मत्यागे तात्पर्यमित्यर्थः । 'शरणं व्रज'इति विधीयमानप्रपदनाङ्गं चोद्यत इत्याह – कार्पण्यम् इति ।

''अङ्गसामग्र्यसम्पत्तेः अशक्तेश्चापि कर्मणाम् ।
अधिकारस्य चासिद्धेः देशकालगुणक्षयात् ॥

उपाया नैव सिध्यन्ति ह्यपाया बहुळास्तदा ।
इति या गर्वहानिः तद् दैन्यं कार्पण्यमुच्यते ॥''

इति त्युक्तम् । तात्पर्यान्तरमाह – भजनेति । भक्तिवत् कर्मादिसापेक्षत्वं नास्तीत्यर्थः । प्रकारान्तरमाह – दुस्साधेति । क्वचित् चापलातिशयात् अशक्यार्थप्रवृत्ते कस्मिंश्चित् पुरुषे दुस्साधेच्छोद्यमादाविति त्वया साधयितुम् अशक्येऽर्थे इच्छा उद्योगश्च ते व्यर्थ इत्यर्थ इत्ययं गमयतीत्यर्थः । अर्थान्तरमाह- अन्येति । अन्यसम्मेळन इति । प्रपत्त्यङ्गानुकूल्यादि- व्यतिरिक्तकर्मपरिकरस्वीकारः। ब्रह्मास्त्रेति । सकृत्कृतस्योपायस्य महाफलसाधकत्वं कथम् उपपद्यते ? तथाऽपि शास्त्रविहितत्वेन उपायत्वे यत् किञ्चित् अङ्गजातं तदर्थमनुष्ठेयमिति कर्मादि- सम्मेळनकरणे ब्रह्मास्त्रन्यायेन उपायप्रच्युतिर्भवति इति कर्मान्तरत्यागवचनगतिरूहनीयेति भावः । तत् – तस्मात्, आज्ञानुवादिसिद्धो धर्मः त्याज्यत्वेन न कुत्रापि विहितः। ननु मुख्यार्थपरित्यागेन अर्थान्तरकल्पनमनुपपन्नमिति चेत् – उच्यते । बहूनामनुग्रहो न्याय्य इत्यनन्यथासिद्धवचनशतप्रतिपन्नसर्वधर्माणां वर्णाश्रमनियतानां भगवदाज्ञासिद्धानां अनुज्ञासिद्धानां च परित्याग कल्पनाया अपि पूर्वोक्तगत्यन्तरमेव वरम् । एतेन, ''ज्ञानयुक्तो विरक्तश्च मद्भक्तश्चानसूयकः । स्वलिङ्गान् आश्रमान् त्यक्त्वा

चरेदविधिगोचरः ॥ '' इत्यादिवचनानामपि सङ्गत्याग एव तात्पर्यात् यथाश्रुतार्थमात्रतृप्ताः स्वैरचारिण इति अन्त्याश्रमिणोऽपि निरस्ताः ॥ १५ ॥

(१६)

केचिदाहुः- ''मामेकं शरणं व्रज'' इति उपायभूतस्यैकत्वप–तिपादनात् उपायान्तरं निषिध्यते ; ततः प्रपत्तेः अनुपायत्वात् पूर्वं प्रतिपादितं सर्वं असमञ्जसमिति । तान् प्रत्याह – आदेष्टुमिति ।

आदेष्टुं स्वप्रपत्तिं तदनुगुणगुणाद्यन्वितं स्वं मुकुन्दो
मामित्युक्त्वेकशब्दं वदति, तदुचितं तत्र तात्पर्यमूह्यम् ।
तत् प्राप्यप्रापकैक्यं सकलफलदतां न्यासतोऽन्यानपेक्षां
प्राधान्याद्यं च किञ्चित् प्रथयति स परं श्रीसखे मुक्त्युपाये ॥

मुकुन्दः स्वप्रपत्तिम् आदेष्टुम् – उपदेष्टुम् तदनुगुणगुणाद्यन्वितं – प्रपत्त्यनुगुणवात्सल्यादिविशिष्टं स्वम् – आत्मानं मामित्युक्त्वा तदनन्तरमेकमिति शब्दं वदति । तत्र – तस्मिन् प्रकरणे । तदुचितम्– एकशब्दोचितं तात्पर्यं ऊह्यम् ,विचक्षणैः इति शेषः । तात्पर्यमेव बहुधा वर्णयति – तदिति । सः = एकशब्दः । लोके साध्यसाधनयोः भेदो दृष्टः, यथा ज्योतिष्टोमस्वर्गयोः । अत्र तु भेदो नास्तीति

तात्पर्यमाह । अथवा सकलफलदतां – अस्यैव सकलपुरुषार्थप्रदत्वम् । प्रथयति इति प्रत्येकं सम्बन्धः । यद्वा ''शरणं व्रज'' इति प्रपत्तेः विधीयमानत्वात् तद्व्यतिरिक्तंनैरपेक्ष्यमाह – न्यासेति । अर्थान्तरमाह-प्राधान्येति ।'एक' शब्दः प्रधानार्थतया प्रसिद्धः । मुक्त्युपाये इति उक्तार्थोपपत्तिसूचकः । उपायत्वेऽपि एकशब्दाविरोधवत् प्रपत्तेः साध्योपायत्वेऽपि न विरोध इति श्रीसखपदतात्पर्यमूह्यम् ॥ १६ ॥

(१७)

स्वाभीष्टप्राप्तिहेतुः स्वयमिह पुरुषैः स्वीकृतः स्यादुपायः
शास्त्रे लोके च सिद्धः, स पुनरुभयथा सिद्धसाध्यप्रभेदात् ।
सिद्धोपायस्तु मुक्तौ निरवधिकदयः श्रीसखः सर्वशक्तिः
साध्योपायस्तु भक्तिर्न्यसनमिति पृथक् तद्वशीकारसिद्ध्यै ॥

उपायशब्दार्थं वक्ति – स्वाभीष्टेति । स्वस्याभीष्टफलप्राप्त्यै हेतुः पुरुषैः स्वीकृतः स्यादुपाय इति । अयं सर्वसाधारण इत्याह - शास्त्र इति । तं विविनक्ति – स इति । सिद्धसाध्ययोः विषयविभागं दर्शयति– सिद्धेति । उपायत्वनिर्वाहकगुणानाह- निरवधिकेत्यादि । साध्येति भक्तिः । न्यसनं – प्रपत्तिः। साध्योपायफलमाह - तद्वशीकारेति । ''तस्य च वशीकरणं तच्छरणागतिरेव'' । 'भक्तिक्रीतो जनार्दनः' इति प्रयोजनकथनम् ॥ १७ ॥

(१८)

पूर्वप्रतिपादनमेव साङ्गभरसमर्पणं यथावदनुष्ठाय मुखभेदेन शिक्षयन् तद्विषये कर्तव्यशेषं नास्तीत्याह - अत्यन्तेति –

अत्यन्ताकिञ्चनोऽहं त्वदपचरणतः संनिवृत्तोऽद्य नाथ
त्वत्सेवैकान्तधीः स्यां त्वमसि शरणम् इत्यध्यवस्यामि गाढम् ।
त्वं मे गोपायिता स्यास्त्वयि निहितभरोऽस्म्येवम् इत्यर्पितात्मा
यस्मै स न्यस्तभारः सकृदथ तु सदा न प्रयस्येत् तदर्थम् ॥

अत्यन्ताकिञ्चन इत्याकिञ्चन्यमुक्तम् । त्वदपचरणतः सन्निवृत्तः इत्यपचारात् निवृत्तिवचनेन प्रातिकूल्यवर्जनमुक्तम् । त्वत्सेवैकान्तधीः इति आनुकूल्यसंकल्प उक्तः । शरणमित्यध्यवस्यामीति महाविश्वास उक्तः । त्वं मे गोपायितेति गोप्तृत्ववरणमुक्तम् । त्वयि निहितभर इति प्रपदनमुक्तम् । यस्मै – प्रयोजनाय । सकृदित्यावृत्तिराहित्यं सूच्यते । सदा – यावत्फलप्राप्तीत्यर्थः। तदर्थम् – उपायसिद्ध्यर्थं, न प्रयस्येत् – न प्रयत्नं कुर्यात् । ''सकृदेव हि शास्त्रार्थः'' इति सकृत्करणेनैव उपायसिद्धिः । तदर्थं यत्नस्तु अनुपपन्न इत्यर्थः॥१८॥

(१९)

एवं कृतकृत्यत्वादस्याधिकारिणस्त्याज्यमुपादेयमुज्जीवनार्थं अनुसन्धेयं प्रार्थनीयं च सङ्गृह्याह ॥

त्यक्त्वोपायानपायान् अपि परममजहन्मध्यमां स्वार्हवृत्तिं
प्रायश्चित्तं च योग्यं विगतऋणततिर्द्वन्द्ववात्यां तितिक्षुः ।
भक्तिज्ञानादिवृद्धिं परिचरणगुणान् सत्समृद्धिं च युक्त्या
नित्यं याचेदनन्यस्तदपि भगवतस्तस्य यद्वाऽऽप्तवर्गात् ॥

''उपायापायसंयोगे निष्ठया हीयतेऽनया'' इति उपायादिसंयोगस्य निष्ठाभञ्जकत्वात् तस्य त्याज्यत्वमिति भावः । उपायशब्देन साधनान्तरमुच्यते । अपायशब्देन निषिद्धकर्मोच्यते । परं – प्रपत्त्युत्तरम् । उपायापायत्यागे पश्वादिवद् वर्तनं स्यादित्यत्राह– मध्यमाम् इति । स्वार्हवृत्तिं – प्रपन्नार्हवृत्तिम् । ''उपायापाययोर्मध्ये कीदृशी स्थितिरम्बिके । उपायोपायतामेव क्रिया सर्वाऽवलम्बते'' ॥ इति शक्रेण परिचोदने श्रियोक्तमाह- ''त्रिविधां पश्य देवेश कर्मणो गहनां गतिम् ॥ निषेधविधिशास्त्रेभ्यः तां विधां च निबोध मे । अनर्थसाधनं किञ्चित् किञ्चिच्चाप्यर्थसाधनम् । अनर्थपरिहाराय किञ्चित् कर्मोपदिश्यते । त्रैराश्यं कर्मणामेवं विज्ञातं शास्त्रचक्षुषा ॥ उपायापायसंज्ञौ तु पूर्वौ राशी परित्यजेत् । तृतीयो द्विविधो राशिरनर्थपरिहारकः ॥ प्रायश्चित्तात्मकः कश्चित् उत्पन्नानर्थनाशकः । तमंशं नैव कुर्वीत मनीषी पूर्वराशिवत् ॥ क्रियमाणं न कस्मैचित् यदर्थाय प्रकल्पते । अक्रियावदनर्थाय तत् कर्म न समाचरेत् ॥ एषा सा वैदिकी निष्ठा ह्युपायापायमध्यमा । अस्यां स्थितो जगन्नाथं प्रपद्येत जनार्दनम् ॥'' इति ॥ तदेतद्वचनार्थजातं अत्रानुसन्धेयम् । ''शक्तौ प्रतिपदं कुर्यादशक्तौ

शरणागतिम्''इति वचनार्थमाह – प्रायश्चित्तं च योग्यमिति । अस्य अधिकारिणस्तु योग्यं प्रायश्चित्तं प्रपदनमेव । ''अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत् । प्रायश्चित्तिरियं साऽत्र यत् पुनश्शरणव्रजेत् ॥'' इति वचनात् । यथा योगनिष्ठस्य ''अपि चेत् पातकं किञ्चित् योगी कुर्यात् प्रमादतः । योगमेव निषेवेत नान्यं योगं समाचरेत्॥'' इति पातकसम्भवे कर्मरूपप्रायश्चित्तव्यतिरेकेण योगस्यैव प्रायश्चित्तत्वेन विधानम् ; तद्वदत्रापीति तात्पर्यम् । विगतऋणततिः– देवर्षिपितॄणां ऋणानि त्रीणि ब्रह्मचर्यादिभिः अपोह्यानि । प्रपन्नस्य तु प्रपत्त्यैव सर्वं अपाक्रियते । देवयज्ञादीनां च मध्यमवृत्त्यनुप्रवेशात् कैङ्कर्यान्तर्भाव इति भावः । तदुक्तम् –'' देवर्षिभूतात्मनृणां पितॄणां न किङ्करो नायमृणी च राजन् । सर्वात्मना यः शरणं शरण्यं नारायणं लोकगुरुं प्रपन्नः ॥'' इति । द्वन्द्वेति । द्वन्द्वं- सुखं दुःखं च । तदेव वात्यां – भ्रमणवायुं, तितिक्षुः– सहमानः । अनेन कर्मानुभवेन तत्क्षये सञ्जातहर्षत्वम् , निरन्तरभगवत्कैङ्कर्यैकप्राप्तिहर्षश्च द्योत्यते । एवम्भूतस्य अधिकारिणो यावत्प्राप्ति किमपि न प्रार्थनीयं स्यात्; ''याचनान्नश्यति ध्रुवम्''इति वचनादित्याशङ्क्य प्रार्थनीयान् अर्थान् विविनक्ति – भक्तीति । अनेन ''तत्पादभक्तिज्ञानाभ्यां फलमन्यत् कदाचन । न याचेत् पुरुषो विष्णुं याचनान्नश्यति ध्रुवम् ॥'' इति वचनं स्मारितम् । परिचरणगुणान् - कैङ्कर्योपकरणभूतगन्धमाल्यवस्त्रभूषादीन् । सत्समृद्धिं - भागवतानामुत्तरोत्तरमभिवृद्धिम् । युक्त्या – औचित्येन सत्समृद्धेः

योजनम् । तस्याः कैङ्कर्यार्थत्वे कर्तव्यं अनुपयुक्तं न याचितव्यमिति भावः । एतादृशफलप्रार्थनायामपि अनन्यप्रयोजनत्वं न विहन्यत इत्यभिप्रायेणाह–अनन्य इति । तदपि सर्वेश्वरादेव याचेत्; अन्यथा निष्ठाभङ्गः स्यादित्याह – तदपि भगवत इति । यद्वा तस्य–भगवतः आप्तवर्गात् =विष्क्सेनादिकादित्यर्थः । अनेन देवतान्तरेभ्यः तदीयेभ्यश्च भक्त्यादिकं न याच्यमित्युक्तं भवति । तथा प्रपन्नानां दुर्निमित्तादिप्राप्तावपि न देवतान्तरभजनं कार्यम् । पादमूलं प्रपन्नः । तदुक्तम्-''दुर्निमित्ते भये प्राप्ते ग्रहादीनां विपर्यये । विष्णुतद्भक्तपूजाभिः शान्तिं कुर्वीत, नान्यथा ।।'' अत्रापि शान्तिविधाने न तात्पर्यम् । किन्तु मन्दस्य कस्यचित् अधिकारिणः सम्भवेऽपि उपायान्तरत्यागो विधीयते । तथा ''प्राज्ञैः प्रियतमैः भोगैः विशेषेण जनार्दनम् । आराधयेद् निमित्तेषु वैष्णवांश्च विधानतः ।।'' इत्यादिकं ज्ञेयम् । तस्माद् भक्त्यादिकं भगवतः तदीयेभ्यो याचयेत् । शान्तिपौष्टिकादिकं च भगवन्तं उद्दिश्यैव कुर्यात्; न ब्रह्मरुद्रादिकमिति प्रपन्नानां कर्तव्यमिति विवेकः ।। १९ ।।

(२०)

एवंभूतस्याधिकारिणः स्वोचितकाले परमपुरुषावाप्तिमाह – आज्ञेति ।।

आज्ञाकैङ्कर्यवृत्तिष्वनघगुरुजनप्रक्रियानेमिवृत्तिः
स्वार्हानुज्ञातसेवाविधिषु च शकने यावदिष्टं प्रवृत्तः ।

कर्म प्रारब्धकार्यं प्रपदनमहिमध्वस्तशेषं द्विरूपं
भुक्त्वा स्वाभीष्टकाले विशति भगवतः पादमूलं प्रपन्नः ॥

अकरणे प्रत्यवायकरणमाज्ञाकैङ्कर्यं, तदत्र विवक्षितम् । अनघगुरुजनाः, तेषां प्रक्रिया । स्वार्हेति । स्वाधिकारोचितेषु अनुज्ञातसेवाविधिषु, अकरणे प्रत्यवायरहितानुज्ञाकैङ्कर्यविधिषु इत्यर्थः । शकने – शक्तौ सत्याम् । अकरणे प्रत्यवायराहित्यादेव– यावदिष्टमित्युक्तम्। प्रारब्धकार्यम्–समारब्धस्य कार्यं- सुखदुःखं कर्म । प्रपदनमहिमध्वस्तशेषम् । अनेकदेहानुभाव्यमपि प्रपन्नभावेन वर्तमानदेहावधिकत्वेन शिष्टस्य विध्वंस इत्यर्थः। द्विरूपं – पुण्यपापरूपम् । स्वाभीष्टकाले– प्रपत्त्युत्तरकाले देहावसाने वा, यदा प्राप्तीच्छा तस्मिन् काले इत्यर्थः ॥ २०॥

(२१)

भगवत्प्राप्त्युपायभूतां प्रपत्तिं प्रमाणादिभिः विशिंषन् स्वप्रबन्धकरणस्य प्रयोजनमाह – श्रुत्येति ।

श्रुत्या स्मृत्यादिभिश्च स्वयमिह भगवद्वाक्यवर्गैश्च सिद्धां
स्वातन्त्र्ये पारतन्त्र्येऽप्यनितरगतिभिः सद्भिरास्थीयमानाम् ।
वेदान्ताचार्य इत्थं विविधगुरुजनग्रन्थसंवादवत्या
विंशत्या न्यासविद्यां व्यवृणुत सुधियां श्रेयसे वेङ्कटेशः ॥

''मुमुक्षुर्वै शरणमहं प्रपद्ये'' ''तस्माद् न्यासमेषां

तपसामितिरिक्तमाहुः, ब्रह्मणे त्वामहस ओमित्यात्मानं युञ्जीत'' इत्यादिका श्रुतिः ॥ ''यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः । तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः ॥'' इत्यादिका स्मृतिः । आदिशब्देन पुराणरत्न–श्रीपाञ्चरात्रयोर्ग्रहणम् । तथा श्रीविष्णुपुराणे भगवता पराशरेण उक्तम्-''तावदार्तिः तथा वाञ्छा तावन्मोहस्तथाऽसुखम् । यावन्न याति शरणं त्वामशेषाघनाशनम् ॥'' इति । ''कमलनयन वासुदेव विष्णो धरणिधराच्युत शङ्खचक्रपाणे । भव शरणमितीरयन्ति ये वै त्यज भट दूरतरेण तान् अपापान् ॥'' इति । श्रीपाञ्चरात्रे लक्ष्मीतन्त्रे प्रपत्तिप्रतिपादनं सुस्पष्टम् – ''अहमस्म्यपराधानामालयोऽकिञ्चनोऽगतिः ॥ त्वमेवोपायभूतो मे भवेति प्रार्थनामतिः । शरणागतिरित्युक्ता सा देवेऽस्मिन् प्रयुज्यताम् ॥'' इति । भगवद्वाक्यवर्गैरिति । श्रीवराहपुराणे भूदेवीं प्रतिं वराहरूपेण भगवतोक्तम्- ''स्थिते मनसि सुस्वस्थे शरीरे सति यो नरः । धातुसाम्ये स्थिते स्मर्ता विश्वरूपं च मामजम् ॥ ततस्तं म्रियमाणं तु काष्ठपाषाणसन्निभम् । अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥'' इति । तथा दाशरथिनाऽपि-

''सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥'' इत्यादि । तथा वासुदेवेनापि- ''सर्वधर्मान्'' इत्यादि । यद्यपि एषां वचनानां पुराणस्थत्वं विद्यते । तथापि परमात्मपुरुषोत्तमोक्तत्वेन अत्यन्तं प्रामाण्यमस्तीति पृथगुक्तम् । स्वातन्त्र्यशब्देन पृथगुपायत्वमुक्तम् । पारतन्त्र्यशब्देन साधनान्तराङ्गत्वम् ।

अनितरगतिभिः=गत्यन्तरशून्यैः, सद्भिर्यामुनाचार्यप्रमुखैःप्रपत्ति निष्ठैः, आस्थीयमानां– सर्वफलसाधनत्वेन अङ्गीकृत्य क्रियमाणाम् । विविधगुरुजनग्रन्थसंवादवत्या – विविधो नानाविधः । गुरुजनानां ग्रन्थः । तत्र संवादयुक्तया (वत्या) । अनेन पूर्वाचार्याभिप्रेतत्वं दृढीकृतम् । विंशतिः इति ग्रन्थनाम । सुधियां श्रेयसे इति स्वग्रन्थनिर्माणस्य प्रयोजनमुक्तम् । व्यवृणुत - विवृतवान् । अनेन स्वग्रन्थस्य साफल्यमुक्तम् । श्रुत्यादिषु सम्यग् विचार्य वर्णित इति भावः । सुधियामिति सारासारविवेकज्ञानसुधियाम् । विद्वांसो विमत्सराः प्रमाणपरतन्त्राः विवक्षिताः ।अनेनाभ्यसूयया परिग्रहाभावो न दोषावह इत्युक्तम् ॥

(२२)

एवं उपपादितां प्रपत्तिं सुखप्रतिपत्त्यर्थं स्वानुष्ठानमुखेन निगमयति – संसारेति ।

संसारावर्तवेगप्रशमनशुभदृग्देशिकप्रेक्षितोऽहं
संत्यक्तोऽन्यैरुपायैरनुचितचरितेष्वद्य शान्ताभिसन्धिः।
निःशङ्कस्तत्त्वदृष्ट्या निरवधिकदयं प्रार्थ्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद ! निजभरं निर्भरो निर्भयोऽस्मि ॥

संसाररूपभ्रमिवर्गप्रशामककल्याणगुणरूपदृक्पातयुक्ताचार्य-विषयीकृत इति भगवत्प्रपत्तौ साधनमुक्तम् । अन्यैः कर्मादिभिः,

उपायैः-फलसाधनभूतैः। सन्त्यक्त इत्यनेन त्यागविधिपक्षः क्षपितः। अनुचितचरितेषु – अपायकर्मसु। शान्ताभिसन्धिः– न कुर्यामित्यभिसन्धिविराममात्रेण पूर्वकृतानां अनन्तानाम् अपि दुरितानां निवृत्तिः स्यादिति भावः। अस्मिन् पदे आनुकूल्यसङ्कल्पः प्रातिकूल्यस्य वर्जनं च विवक्षितम्। निःशङ्कः - शङ्कारहितः, महाविश्वासयुक्त इत्यर्थः। तत्त्वदृष्ट्या- तत्त्वज्ञानेन। निरवधिकगुणम्-अनवधिकातिशयासंख्येयकल्याणज्ञानशक्तिबलैश्वर्य–तेजस्सौलभ्यसौशील्यकारुण्यवात्सल्यपूर्णादिगुणगणौघमहार्णवम्। अनेन शङ्कानिरासोऽपि सिद्धः। संरक्षकम् प्रार्थ्येति गोप्तृत्ववरणमुक्तम्। त्वपादपद्मे - पूर्वोक्तगुणयुक्तभगवत्पादारविन्दयुगले। निजभरम्- आत्मात्मीयं सर्वं, न्यस्य - निक्षिप्य। निर्भरो निर्भय इति प्रपत्तिकरणानन्तरं मोक्षार्थानुष्ठानाभावात् स्वरक्षणे स्वान्वयाभावो, मध्ये प्रत्यवायसम्भवेऽपि तत्तदुचितेन प्रतिविधानेन तच्छमनं कृत्वा स्वकैङ्कर्योपयुक्तं करिष्यतीति स्वाकृत्यकरणनिमित्तभयं व्यावर्त्यते।

न्यस्येति प्रपदनं सूचितम्। अत्र कार्पण्यरूपमङ्गं चानुसन्धेयम्। मुमुक्षूणां शिक्षणीयं भगवद्वेदान्ताचार्योक्तम् अत्रानुसन्धीयते। मुमुक्षोः अनुशासनीयसंग्रहः। सदाचार्योपसत्तिपूर्वकं समन्त्रकं सम्यग्ज्ञानं सम्पाद्य गुरुतरोपायान्तरनिष्ठसाधनानुगुणज्ञानशक्तिविरहाद् निर्विण्णः स्वशक्यसकृत्कर्तव्यलघूपायपरामर्शेन प्रत्यव-स्थापितफलसङ्गकर्तृत्वादित्यागयुक्तसाङ्गभरन्यासनकृतकृत्यः स्वीकृतभरं शरणं श्रियः पतिं अवलोक्य निर्भरो निर्भयश्च

स्वप्रयोजनकैङ्कर्येण सुखं वर्ते इति ।

श्रीमन्नारायणमुनिः सम्प्रदायानुसारतः ।
टीकां पटीयसां प्रीत्यै चकार न्यासविंशतेः ॥

इति श्रीमन्नारायणमुनिनामधेय- श्रीमत्परमहंसपरिव्राजकाचार्यकृता न्यासविंशतिटीका सम्पूर्णा ॥

श्रीनिवासमहागुरवे नमः ॥ श्रीमद्वेङ्कटगुरवे नमः॥

श्रीमन्नृसिंहगुरवे नमः॥ श्रीमते देवराजगुरवे नमः॥

श्रीमते रामानुजगुरवे नमः ॥

श्रीः

श्रीमन्निगमान्तमहादेशिकैः
स्वयमनुगृहीता न्यासविंशतिव्याख्या

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रुतिस्मृत्यादितात्पर्यं निरूढा न्यासविंशतिः ।
स्वयं व्याक्रियतेऽस्माभिः दिङ्मात्रेण सदिच्छया ॥

[1]प्रपत्त्याद्यपरपर्यायां न्यासविद्यां [2] सञ्जिघृक्षुः प्रथमं तत्त्वज्ञानदिमुखेन तदधिकारहेतुभूतमाचार्यसंग्रहणमाह – **सिद्धम्** इति ।

एतेषामाचार्यगुणानां प्रमाणानि– ''तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'' [3]इत्यादीनि । **श्रोत्रियं**–श्रुतवेदान्तम् । **समयनियतया** –यथाकालं प्रवृत्तया; यद्वा धर्मज्ञसमयव्यवस्थितया । **जितविषयिगणं** – स्ववशेन्द्रियवर्गम् । सम्यक्

---

[1] प्रपत्त्यपरपर्याया [2] सञ्जिघृक्षुः तत्त्वज्ञानादि............संग्रहमाह [3] इत्यादीनि द्रष्टव्यानि । समयनियतया ।

ज्ञानार्थतया गुर्वभिगमनेऽपि स्वेच्छया [1]प्रवर्तमानस्य नियमांशमात्रे [2]विधिरिति ज्ञापनार्थम् **ईप्सेत्** इति सन्प्रयोग'': ॥ १ ॥

''आचार्यवान् पुरुषो वेद'', ''आचार्याद्धैव विदिता विद्या साधिष्ठं [3]प्रापत्'' ''आचार्यवत्तया मुक्तौ'' इत्यादिप्रमाणानुसारतः आचार्यवरणे सिद्धे, ''आचार्यदेवो भव'' ''देवामिवाचार्यमुपासीत'' इत्यादिविहितम् तत्सेवनमाह– **अज्ञानध्वान्ते** इति ।

अत्र उक्ता हेतवः आचार्ये भगवति च अन्वीयन्ते । जन्मप्रध्वंसिजन्म–विद्याजन्म। ''ब्रह्मविद्याप्रदानस्य देवैरपि न शक्यते । प्रतिप्रदानम्; अथवा दद्याच्छक्तित आदरात् ॥'' इत्याद्यभिप्रेत्य **अप्रत्युपकरणधिया** इत्युक्तम् ॥ २ ॥

सम्यगुपसन्नो सच्छिष्ये ''तस्मै स विद्वान्'' इत्यादिविहितमाचार्यकृत्यमाह – **सद्बुद्धिः** इति ।

[4]**अभिमतं–**मोक्षोपयुक्तमर्थजातम् ॥ ३ ॥

मुक्तिकामस्य [5]मूलमन्त्राद्याभिधेयतया शिक्षणीयेऽथ प्रधानांशं, तस्य च नित्यानुसन्धेयत्वमाह –**स्वधीन** इति ॥ ४ ॥

ईदृशोपदेशलब्धसम्यग्ज्ञानस्य पुरुषस्य ''अनित्यमसुखं लोकमिमं

---

[1]प्रवृत्तस्य [2] विधिज्ञापनार्थं [3]प्रापत् ''आचार्य वत्तया मोक्षमामनन्ति...मुक्तौ'' इत्याद्यनुसारतः आचार्यवरणे सिद्धे, ''देवमिव [4] इदं न दृश्यते [5] मूलमन्त्राद्यभिप्रेततया शिक्षणीये प्रधानांशं तस्य नित्यत्वं चाह

प्राप्य भजस्व माम्'', ''मामेकं शरणं व्रज'' इत्यादिभिरपवर्गोपायतया विहितयोः भक्तिप्रपत्त्योः [1] अधिकारिव्यवस्थामाह –**मोक्षोपाय** इति ॥ ५ ॥

इत्थमधिकारिभेदात् गुरुलघुविकल्पसंभवेऽपि प्रपत्तिप्रभावे दुर्बलबुद्धीन् प्रत्याययति–सानुक्रोश इति ।

वान–वायस–राक्षस–द्रौपदी–गजेन्द्र–सुमुख–त्रिशङ्क–शुनश्शेफाद्युपाख्यानैः इति शेषः **धर्मस्थेयाः** –विवादगोचरधर्मनिर्णेतारः । **पूर्वे** भगवद्यामुनादयः ॥ ६ ॥

'अस्त्वेवमतिशङ्कापरिहारेण सर्वशास्त्रसाधारणो विश्वासः, तस्य प्रपत्तिलक्षणवाक्ये महत्त्वेन विशेषणं किमर्थम् ? इत्यनुभाष्य परिहरति–**शास्त्रप्रामाण्ये** – ति ।

''अत्र अर्थस्वभावेन शङ्काप्रकर्षसंभवात् तन्निवृत्त्यै ''विदितः स हि धर्मज्ञः'' ''मित्रभावेन संप्राप्तम् '' ''सकृदेव प्रपन्नाय'' [2]इत्यादिप्रसिद्धशरण्य-गुणविशेषादिपरामर्शभूम्ना विश्वासप्रकर्षः संपाद्य इति भावः ॥

[3] किमीदृशविश्वाससापेक्षतया गुरुतरया प्रपत्त्या ? '' सकृज्जप्तेन मन्त्रेण कृतकृत्यः सुखी भवेत्'', ''प्रपत्तिवाचैव निरीक्षितुं वृणे '',

---

[1]अधिकारव्यवस्था [2]इत्यादिशरण्यगुणविशेषादिविमर्शभूतमहाविश्वासादिप्रकर्षः
[3]कमीदृशविश्वासापेक्षया

इत्यादिप्रमाण–संप्रदायैः शरणागतिमन्त्रोच्चारणमात्रेणैव मुक्तिः [1] सिध्येदित्यत्राह –**नेहाभिक्रान्तिनाश** इति। **उक्तम्** – [2] कर्मयोगप्रकरणे इति शेषः।

''सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्'' इत्यादिन्यायेन अत्र मन्त्रोच्चारणादिकं यथावस्थितप्रपत्त्यनुष्ठानमुत्पाद्य तन्मुखेनैव मुक्तिं साधयति। यथोक्तं [3]सात्यकितन्त्रे, ''अनेनैव तु मन्त्रेण स्वात्मानं मयि निक्षिपेत्। मयि निक्षिप्तकर्तव्यः कृतकृत्यो भविष्यति'' – इति॥

ननु एवं प्रपत्तिरपि भक्तियोगद्वारेणैव मुक्तिहेतुः स्यात् इत्याशङ्कायां, ''मुमुक्षुर्वै शरणमहं प्रपद्ये'' इति [4] श्रुतिस्वारस्यसिद्धमव्यवहितमोक्षसाधनत्वं [5]व्यञ्जकान्तरैरपि द्रढयति–

प्रोक्तः – ''तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः'' इति वाक्येन। **कथितः**– ''यः समिधा '' इत्यारभ्य, ''यो नमसा स स्वध्वरः '' [6]इत्यृगंशेन। **अन्वबादीत्**– ऋगर्थमन्वभाषत। यथा ''समित्साधनकादीनां यज्ञानां न्यासमात्मनः। नमसा योऽकरोद् देवे स स्वध्वर इतीरितः॥'' इति। **अगणि दिविषदामुत्तमं गुह्यमेतत्**– ''एतद्वै महोपनिषदं देवानां गुह्यम्'' इत्यादिश्रुत्या। **तन्निष्ठः** इत्यादिना ''सत्कर्मनिरताः शुद्धाः'' इत्याद्युक्तप्रपन्नप्रभावो विवृतः। यद्यपि

---

[1]सिध्येदित्याह [2]कर्मयोगाधिकारे [3]सात्वततन्त्रे [4]श्रुतिस्वारस्यविरुद्धं [5]व्यञ्जकान्तरेणापि [6]इत्यन्तेन ऋगंशेन....ईशानोऽन्वभाषत।

''ओमित्यात्मानं युञ्जीत'' इति प्रणवकरणको न्यासः श्रुतः, तथाऽपि तदनर्हाणां तद्विरहेऽपि [1]तन्त्रोक्तप्रकारेण तत्प्रयोगो युज्यते इत्यभिप्रायेण **तन्निष्ठ** इति सामान्योक्तिः । श्रुतिसिद्धेऽपि प्रपदने सामान्यधर्मभूतसत्यवचनादिनयात् सर्वाधिकारत्वं च न विरुद्धम् । ''सर्वस्य शरणं [2]सुहृत् '', ''सर्वलोकशरण्याय '' इत्यादिष्वेतदभिप्रेतम् ॥ ९ ॥

'सन्तु भाष्योक्त भक्त्यङ्गभूतप्रपत्तिप्रशंसापराणि एतानि वाक्यानि, गुणोपसंहारपादे प्रपत्तेः स्वतन्त्रविद्यात्वस्थापनाभावात्, [3]अनन्यथासिद्धसमान–न्यायाभावाच्च' इति शङ्कायां, प्रपदनस्य मोक्षं प्रति पृथगुपायत्वोपपादनं तत्रैव सुस्पष्टमित्याह –

अभाक्तात्–अनौपचारिकात् इत्यर्थः । सद्विद्यादहरविद्यादिषु **शब्द**भेदो हि तत्तद्गुणविशिष्ट [4]ब्रह्मविषयप्रत्ययावृत्त्य-भिधायित्वरूपेणोपपाद्यः; इह तु यागदान होमादिवत् अपर्यायतयैव [5]व्युत्पत्तेः सिद्धः इति भावः । न्यासविद्या इति **आख्या** । अर्थस्वभावादत्र [6]अभिमतप्रदानसामर्थ्य विशिष्टपरनिरपेक्षरक्षकत्वं **रूपम्** । **आदि**शब्देन परिकरप्रकरणयोः ग्रहणम् । **इतरसमः**– विद्यान्तरसमः । [7]**किं च** इत्यादिना प्राग्दर्शिताधिकारिभेदस्मारणम्

---

[1]तन्त्रोक्तप्रकारोऽत्र, तत्रोक्तप्रकारेण तप्रयोगोऽत्र [2]सुहृत्'' इत्याद्यभिप्रेतम् [3] अनन्यथासिद्धसामान्यन्यायाभावाच्च [4]ब्रह्मविषयप्रत्ययावृत्त्यभिधायि [5]उत्पत्तेः सिद्धिः [6]अभयाप्रदानसामर्थ्यविशिष्टपरमकारुणिकतया [7]किं चेत्यादि प्राग्दशिताधिकारिभेदस्मारणम् । भाष्ये तु प्रपत्तेः......।

स्वातन्त्र्येण मोक्षोपायत्वेन सद्विद्यादेः व्यावृत्त इहाधिकारो न स्यादिति शङ्कायां मधुविद्याद्युदाहरणम् । भाष्ये तु प्रपत्तेः भक्त्यङ्गत्त्वोक्तिः न [1]स्वातन्त्रबाधिका; विषयभेदादुभयाकारयोगिषु क्वचिदन्यतरोक्तेरविरोधात् ।। १० ।।

अङ्गत्वमेव प्रपत्तेः इति पक्षः परिहृतः । अथ स्वातन्त्र्येऽपि निरङ्गकत्वपक्षं परिहरति –

अवगमितः– ''तदेकोपायतायाच्ञा प्रपत्तिः'', ''अप्रार्थितो न गोपायेत्'', ''शरणं च प्रपन्नानाम्'' इत्यादिभिः इति शेषः । **तस्मात्** इत्यादिना ''प्रपत्तेः क्वचिदप्येवं परापेक्षा न विद्यते'' इत्यस्य [2]निर्विषयत्वशङ्काव्युदासः । तथा ''षड्विधा शरणागतिः'' इति वचनात् आग्नेयादिषट्कवत् आनुकूल्यसङ्कल्पादिषट्कं संभूय एकं कारणं स्यादित्यत्रोत्तरम् –**साङ्गे तु** इत्यादि । ''न्यासः पञ्चाङ्गसंयुतः'' इति व्यवस्थापकवचनानुगुणमङ्गाङ्गिभावसमुच्चयेन षड्विधत्ववचनं नेयमिति भावः ।। ११ ।।

एवमङ्गाङ्गिभावः सिद्धः । तत्र अवान्तरवैयाकुलीं शमयति–

प्रपत्तिदशायां प्रातिकूल्यवर्जनाद्यभावे साङ्गस्योपायस्य वैकल्यं स्यात् । पश्चात् तु प्रातिकूल्यस्य संभवेऽपि कृतस्योपायस्य न वैकल्यम्; किंतु प्रत्यवायपरिहारार्थं यथार्हं प्रतिविधानमेव कार्यम् ।

---

[1]स्वातन्त्र्यविषयबाधिका.... उभयाधिकारयोगिषु [2]निरङ्गकत्व

‘‘तथा पुंसामविंस्रम्भात् प्रपत्तिः प्रच्युता भवेत्’’

इत्येतदपि तात्कालिकविस्रम्भवैकल्याभिप्रायम् । उत्तरकाले सतोऽपि विश्वासस्य पूर्वकृतप्रपत्त्यङ्गत्वाभावेन तद्विरहे प्रपत्तिप्रच्यवनायोगात् । एवं च ब्रह्मास्त्र न्यायदृष्टान्तः अप्यत्र योग्यांशे स्थाप्यः, अन्यथा अतिप्रसङ्गात् । एतेन ‘‘उपायापायसंयोगे निष्ठया हीयतेऽनया’’ इत्येतदपि गतार्थम् , तात्कालिकोपायापाय–संयोगस्य प्रपत्तिविरोधित्वे तात्पर्यात् । न च आनुकूल्यसङ्कल्पस्य अङ्गत्वेन श्रवणात् सङ्कल्पितकरणमप्यङ्गं, तथा श्रुत्यभावात् यथाश्रुति सङ्कल्पमात्रस्याङ्गत्वे [1]सङ्कल्पिताचरणस्य अङ्गत्वकल्पनानुपपत्तेश्च । अकृत्यकरणकृत्या-करणरूपापायनिवृत्तिस्तु स्वतन्त्रविधेरेव सिध्यति इति नोपप्लवावकाशः ‘‘आनुकूल्येतराभ्यां तु विनिवृत्तिरपायतः’’ इत्यनेनापि अपायनिवृत्तौ सङ्कल्पादिविशेषस्य तात्कालिकोपयोगः [2]प्रदर्श्यते । अत्र आनुकूल्यशब्दो हि तत्सङ्कल्पप्रतिपादनपरः, ‘‘आनुकूल्यस्य सङ्कल्पः’’ [3] इत्यादिसिद्धानुवादात् । न च ‘‘उपायापाय’’ इत्यादौ प्रपत्तिनिष्ठाहानिर्विवक्षिता । किंतु उपायापायत्यागविशिष्ट–मध्यमवृत्तिहानिः । विशेषणाभावेऽपि हि विशिष्टाभावः सिध्यति । अत एव हि तत्र ‘‘अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत्’’ इत्यादिना तावन्मात्रनिमित्तं प्रायश्चित्तमेव विधीयते । न तु पूर्वकृतां प्रपत्तिं प्रच्युतामभिप्रेत्य तत्फलार्थं पुनः प्रपत्तिः ॥ १२ ॥

---

[1]सङ्कल्पितकरणस्य अङ्गत्वकल्पनानुपपत्तेश्च । आनुकूल्येतरा [2]प्रदृश्यते । अत्र [3]इत्यादि सिद्धानुवादत्वात् ।

प्रस्तुतमुख्योपचारप्रयोगव्यवस्थापनाय प्रपत्तिलक्षणं शोधयति–

प्रणयोऽत्र याच्ञा। **आज्ञा**–आज्ञाकरणम्। **आदि**शब्देन भृतिदानादिसंग्रहः। **अनेकार्थभावात्**–शरणशब्दस्य अनेकार्थरूढत्वादित्यर्थः। प्रपदनरूपत्वाभावेऽपि केषाञ्चित् गृहागमनादीनां रक्ष्यताहेतुत्वं प्रसिद्धमित्यभिप्रेत्य **भवति च** इत्यादिकमुक्तम्॥ १३॥

एवं लौकिकवैदिकसर्वप्रपत्तीनां [1]साधारणरूपमुक्तम्। अथ मोक्षैकप्रयोजनायां प्रपत्तौ सर्वनिवृत्तिधर्मसाधारणं स्वाभाविकपरशेषत्वानुसन्धानादिरूपं विशेषमाह–

आत्मीयं–उपायफलादि। **आत्मा** च **आत्मीया**श्चेति यावन्तः अर्थाः सन्ति प्रमाणसिद्धाः तावतां सर्वेषां भगवच्छेषत्वानुसन्धानं कार्यम् तच्चानुसन्धान-उपायदशायामपि निवृत्तिधर्मविधिस्वाभाव्यादनुवर्तते। इह चामुत्र च स्वयंप्रयोजने कैङ्कर्ये स्वत एव भवति। अङ्गिभूतभरन्यासांशस्तु न यावदर्थं; किन्तु यथालोकं यावदनन्यसाध्यं स्वाभीष्टं तावत्येव भवति इत्यर्थः॥ १४॥

सर्वशक्तौ भरं न्यस्यतः सर्वधर्मत्यागवचनात् वर्णाश्रमादिधर्मरूपमाज्ञाकैङ्कर्यं, तदनुविद्धमनुज्ञाकैङ्कर्यं च न स्यातामित्यत्राह–

---

[1]साधारणरूपत्वमुक्तम्

क्वचित्–चापलात् अशक्यप्रवृत्ते कस्मिंश्चिदधिकारिणि । **अन्यसम्मेलने**– प्रपत्त्यङ्गव्यतिरिक्तानां तदर्थतया स्वीकृतौ । तत्– [1]तस्मात् धर्माणां स्वरूपत्यागस्य प्रपत्त्यङ्गत्त्वाभावात् तेषां प्रपत्त्यङ्गत्त्वेनानुपादानाच्च इत्यर्थः । सर्वधर्मत्यागवचनस्य अत्र सर्वाविरुद्धेषु अर्थान्तरेषु संभवत्सु तद्विपरीतार्थकल्पनं न युक्तमिति भगवः । एतेन अलेपकादिपक्षाश्च प्रतिक्षिप्ताः ॥ १५ ॥

ननु यदि प्रपत्तिरुपायः स्यात् तदा हि तस्या अङ्गित्त्वं, केषांचिदङ्गत्वं च वक्तव्यम् । [2]सा तु तत्तद्वाक्येषु उपायतयोक्तस्य शरण्यस्य विशेषणतया [3]प्रयुक्तैरेकादिशब्दैः [4]उपायबुद्ध्यनर्हत्वेन [5] व्यवच्छिद्यते । तस्मात् पूर्वोक्तं सर्वमयुक्तमित्यत्राह –

तत् –विध्यनुरोधेन नेतव्यत्वात् इति भावः । अन्यथाऽप्युपपन्नं सिद्धोपायस्यैक्यं प्रपत्तेः तत्प्रसादोपायत्वं न विरुन्ध्यादिति भावः । [6]एतेन निर्विशेषाद्वैतबुद्धि-विधानादिपक्षाश्चात्र निरस्ताः वेदितव्याः ॥ १६ ॥

उक्तार्थस्थिरीकरणाय सामान्यत उपायशब्दार्थं (विवृण्वन्) सिद्धसाध्योपाय– विशेषौ तत्प्रयोजनं च विभजते –

समर्थितमेव साङ्गभरन्यासं यथावदनुष्ठानाय मुखभेदेन शिक्षयन् तद्विषयकर्तव्यशेषं नास्तीत्याह–

---

[1]तस्मात् दत्तः सर्वधर्माणां....प्रपत्त्यर्थत्वेनाप्रतिपादनाच्च [2]अङ्गित्वं तु [3] प्रयुक्तैरेकशब्दैः
[4] एकोपायबुद्ध्यनर्हत्वेन [5]व्यवह्रियते [6]एवं निर्विशेषा

यस्मै प्रयोजनाय इति शेषः । **सकृत्** इत्यनेन [1]उपासनवदावृत्तिसापेक्षत्वं नास्तीत्युच्यते । ''सकृत् कृतः शास्त्रार्थः'' इत्यस्यात्रापवादो नास्ति । प्रत्युत ''सकृदेव'' इत्यादिभिः अनुग्रह एव । **सदा** – यावत्फलप्राप्तीत्यर्थः ।

ननु न्यासनिष्ठमेव ''तस्यैवं विदुषः'' इति परामृश्य, तत्कर्तव्यत्वेन पुरुषविद्याऽऽम्नाता । सा च ''यन्मरणं तदवभृथः'' इत्यन्ता यज्ञदृष्टिरूपा च । अतो यावज्जीवं तदर्थं कर्तव्यस्य विधीयमानत्वात्, ''न प्रयस्येत् तदर्थम्'' इत्यनुपपन्नम् । मैवम्–तत्रापि हि न्यस्तभरस्य कर्तव्यान्तरनैरपेक्ष्यमेव विवक्षितम् । यदि तु प्रस्तुतविद्याङ्गतयाऽत्र यज्ञक्लृप्तिर्विधीयते तर्हि दर्शपूर्णमासादीनां क्लृप्तिर्न वाच्या । तेषां यज्ञोपयोगित्वाभावात् [2] अश्रुतापूर्वतदन्वितयज्ञान्तर-कल्पनमनेकशास्त्रार्थदृष्टिविधिकल्पनं चात्यन्तगौरवोपहतम् । एकस्यावभृथात् पूर्वमन्येषां क्लृप्तिश्चानुपपन्ना । तस्मात् ''एवं शरणमभ्येत्य भगवन्तं सुदर्शनम् । अनुष्ठितक्रतुशतो भवत्येव न संशयः'' इतिवत् यज्ञादिकं सर्वमस्य स्वतः संपन्नं भवतीति स्तुतिमात्रे तात्पर्यं ग्राह्यम् । शारीरकभाष्यमपि एतदविरोधेन भाव्यम् ।। १८ ।।

कृतकृत्यस्योत्तरदशायां [3]स्वाधिकारानुगुणं त्याज्यं स्वतन्त्रविधिप्राप्तं कर्तव्यमनुसन्धेयं प्रार्थनीयं च संगृह्णाति–

उपायान् – काम्यधर्मान् । **अपायान्** –प्रत्यवायहेतून् ।

---

[1]उपासनवदस्यावृत्ति [2]अश्रुतपूर्वं [3]स्वाधिकाराद्यनुगुणं

परं– केवलम्; प्रपत्त्युत्तरकालं वा। **मध्यमां** – उपायापायवर्गानन्विताम् **स्वार्हवृत्तिं** – नित्यरूपां तत्समाननैमित्तिकरूपां च वृत्तिम् ''अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत् । प्रायश्चित्तिरियं साऽत्र यत्पुनः शरणं व्रजेत्।।'' इत्युक्तमाह –**प्रायश्चित्तं** च **योग्यम्** इति। '**अजहत्**' इत्यनुषज्यते। ''देवार्षिभूतात्मनृणां पितॄणां न किङ्करो नायमृणी च राजन्'' इत्याद्युक्तं सूचयति – **विगतऋणततिः** इति । ब्रह्मचर्यादिभिरपाकर्तव्यं भगवत्प्रपन्नस्य [1]प्रपत्त्यैव कृतम्; [2]देवयज्ञादिकं त्वस्य मध्यमवृत्त्यनुप्रविष्टं कैङ्कर्यमिति भावः । **द्वन्द्वतितिक्षा**वचनं प्रारब्धकर्मक्षयदर्शनजनितप्रीतिसूचकम् अव्याकुलकैङ्कर्यो-पादानार्थं च। **परिचरणगुणान्** – कैङ्कर्योपकरणभूतान् गन्धपुष्पादीन्। यद्वा फलसङ्गत्यागादीन् । [3] **सत्यसमृद्धिर**पि कैङ्कर्यानुपयुक्ता नैव [4]याच्येत्यभिप्रायेण [5]**युक्ताम्** इत्युक्तम् । **भगवतः** इत्यादिना देवतान्तरेभ्यस्तदीयेभ्यश्च भक्त्यादिकमपि न याच्यमिति सूच्यते।। १९ ।।

उक्तप्रकारस्याधिकारिणः स्वाभिमतकाले परमफलप्राप्तिमाह –

प्रपत्त्यङ्गत्त्वाभावेऽपि , ''विहितत्वाच्चाश्रमकर्माऽपि'' इति न्यायेन स्वतन्त्राधिकारसिद्धे शक्तस्यास्य कर्तव्यम् **आज्ञाकैङ्कर्यम्**। अकरणे प्रत्यवायरहितम् **अनुज्ञाकैङ्कर्यम्** । **द्विरूपम्** इति पुण्यपापरूपमित्यर्थः ।। २० ।।

---

[1]प्रपत्त्येवापाकृत [2]देवयज्ञादि कर्तव्यमस्य [3]सत्समृद्धीरपि [4]याचेत् [5]युक्त्या

परमपुरुषार्थसाधिनीं भगवत्प्रपत्तिं प्रमाणतः प्रभावतः प्रवक्तृतश्च विशिंषन् तद्विषयग्रन्थनिर्माणप्रयोजनं च प्रतिपादयति–

''यो ब्रह्माणं विदधाति **पूर्वम्**'' इत्यादिकया **श्रुत्या**; ''देवानां [1]दानवानां च,'' ''शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः'' ''शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः'' इति **स्मृत्यादिभिश्च**; ''स्थिते मनसि सुस्वस्थे ,'' ''सकृदेव प्रपन्नाय'', ''सर्वधर्मान् परित्यज्य'' इत्यादिभिः **भगवद्वाक्यवर्गैश्च** । **सिद्धाम्** –प्रमितामित्यर्थः । आप्ततमत्वसूचनायात्र **भगवच्छब्दः** । **स्वातन्त्र्ये पारतन्त्र्येऽपि**– अव्यवधानेन व्यवधानेन वा मुक्तिसाधनत्वे; यद्वा स्वतन्त्राङ्गत्ववि-वादेऽपि इत्यर्थः । **गुरुजनग्रन्थाः–** स्तोत्रगद्यादयः ।। २१ ।।

उक्तमुपायं सुखग्रहणाय स्वानुष्ठानमुखेन निगमयति–

अत्र सर्वशक्तौ परमकारुणिके सर्वाभिमतवरप्रदे न्यस्तभरत्वात् [2]निर्भरत्वनिर्भयत्वसिद्धिः ।

अयमत्र मुमुक्षोरनुशासनीयसंग्रहः– सदाचार्योपसत्तिपूर्वकं सम्यग् ज्ञानं संपाद्य, गुरुतरोपायान्तरनिष्पादनाद्यनुगुणज्ञानशक्ति-विरहान्निर्विण्णः, स्वशक्यसकृत्कर्त –व्यलघूपायपरामर्शेन प्रत्यवस्थापितः फलसङ्गकर्तृत्वादित्यागयुक्तसाङ्गभरन्यासेन कृतकृत्यः स्वीकृतभरं शरण्यं श्रियःपतिमवलोक्य निर्भरो निर्भयश्च स्वयंप्रयोजनकैङ्कर्येण सुखं वर्तेत इति ।। २२ ।।

कवितार्किकसिंहाय कल्याणगुणशालिने । श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ।।

***

[1]देवानां च, शरण्यं शरणं [2]निर्भरत्व–निर्भयत्वविसिद्धिः